No. ४२४६ च

Title शास्त्रदीपिका प्रथमाध्याये

Author श्रीपार्थसारथी मिश्रः

Extent ५६ Age १६४१

Subject पू०मीमांसा (संपूर्णम्)

नं० ४२४८ - घ

प्रकरणदीपिका प्रथमाध्याय द्वितीय तृतीय चतु-
-र्थ पादाः (पूर्वमीमांसा)

नं० ४२४७ - घ पत्राणि ५-६ (सम्पूर्णम्)

लेखकः श्री पार्थसारथी मिश्रः

संवत् १६४१

नं० ४२४८-घ चतुर्थपाद्यः

शास्त्रदीपिकाप्रथमाध्यायेद्वितीयतृतीय ।

पत्राणि ५६ (सम्पूर्णम्)

लेखकः पार्थसारथी मिश्रः

संवत् १६८४१

र्वमाक्षिप्यते यत्र तत्र सा याक्षेपिकी मता। पूर्वं न्यायात्ययो यत्र प्रत्युदाहरणात्तु सा। प्रसंगात्किं स तेयत्र
तत्र प्रासंगिकी मता। बुद्धिस्थं चिंत्यते यत्र बुद्धिस्थान्यासिका तु सा। हेतुत्वा यत्राधिकांशं कं पूर्वमेव
तिदिश्यते। तत्रातिदेशिकी प्रोक्ता संगतिर्न्यायवेदिभिः। पूर्वसिद्धान्ततो यत्र पूर्वपक्षः प्रवर्तते।
तत्रापवादिकी प्रोक्ता संग.। चिंतां प्रवृत्तसिद्ध्यर्थमुपोद्घातं प्रचक्षते उपोद्घातसंगतिस्सर्वे
तर्गता। द्ध्यगेवसत्तमी वैत्याकुः॥

शास्त्रदीपिकायां प्रथमोध्यायः

४२४६ पूर्णपत्र

सं. ९६४२

॥श्रीगणेशाय नमः॥ ॥कृष्णाय नमः॥ आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यम्
उच्यते। अथातो धर्मजिज्ञासेत्यत्र प्रमाणस्वरूपसाधनफलैः साध्यासैः धर्मो जिज्ञास्यत्वेन प्रति
ज्ञातः। तत्रास्मिन्नध्याये प्रमाणं निरूप्यते किं प्रमाणं धर्म इति तेन यदेव किंचिद्धर्मप्रमाणनि
रूपणमर्थवादमंत्रस्मृतिनामधेयादिगोचरं तत्सर्वमत्रैव संगतं। न ह्यत्र चोदनाप्रामाण्यसा
धनं लक्षणार्थः येन स्मृत्यादेरसंगतिः स्यात्। किं तर्हि धर्मप्रमाणमात्रनिरूपणमत उक्तं भा
ष्यकारेण। को धर्मः कथंलक्षण इति सर्वस्मिन्नध्याये तदेव क्रियत इति समस्तमध्यायं
प्रमाणलक्षणमाचक्षते। तेन लक्षणसंगतिस्तावत्सिद्धा प्रकृतसंगतिरपि चोदनात्प्रामा
ण्यपदपदार्थसंबंधस्यौत्पत्तिकत्वेन वाक्यार्थप्रतीतेर्मूलत्वेन तयाचोपपादिते अनंतरमधि आकोशादि रामन्तय
करणे वेदद्वारेण तासां पौरुषेयत्वमाशंकितं यथोक्तं भाष्यकारेण सन्निकृष्टकाला वेदाः इदा
नीतनास्ते च चोदना संघाताः तत्र पौरुषेया वेदाः अतः संशयं पौरुषेय्यश्चोदना इत्येवमा

वेदापौरुषेयत्वं कर्त्रस्मरणादिसिद्धं १

शंक्य वेदापौरुषेयतया तदवयवानां चोदनानामपौरुषेयतया प्रामाण्यं प्रतिपादितं। एवं
चोदनानां वेदावयवानां प्रामाण्यं साध्यते तदवयवत्वेनोपस्थितानामर्थवादादिभागाना
मप्यपौरुषेयत्वसामान्याच्चोदनावत्प्रसक्तं प्रामाण्यमस्ति न वेति विचार्यते। तदिदमुक्तं
सिद्धप्रमाणभावस्य धर्मे वेदस्य सर्वशः। विध्यर्थवादमंत्राणां उपयोगोऽधुनोच्यत इति।
।अस्यार्थः। चोदनांशे सिद्धप्रमाणभावं वेदं त्रेधा विभज्य किं तावन्मात्रस्यैव प्रामाण्यमु
त सकलस्येति विचार्यते। न विधेरेव किंतु विध्यर्थवादमंत्राणां च सर्वेषां सर्वशः सर्वप्रका
रं। विधिस्तुतिस्मृतिभिः धर्मप्रतीतावुपयोगः प्रतिपाद्यत इति। यद्वा चोदनाधर्मप्रयुक्तेना
पौरुषेयत्वेन समस्तस्य प्रामाण्यसिद्धप्रायमपि बाधकाशंकाभावमाशंक्य स्थितिः किं
यतै विध्यर्थवादमंत्राणामिति तेनापमर्थो विधेरुपयोगः प्रतिपाद्यत इति किं तर्हि विध्या
दीनां सर्वेषामुपयोगोऽस्ति न विधेरेवेति प्रतिपाद्यत इति। नामधेयादिप्रायं वा विधिगु
ण इति। समस्तस्यैतस्येत सर्वशः नामनुविधिगुण्य व्यर्थेतदुपयोगस्य प्रागेवोप
पादनात [illegible] आह विधार्थैर्वादैरिति। अर्थवादादुपयोगनिरूपणेन प्रतिपाद्यत इति चाह

तत्र इष्टसाधनत्वबोधक विध्यभावेन औदुंबरताया इष्टसाधनत्वाप्रतीतेरिति भावः २
विधिभावेनेति। अर्थभावनोच्यते। शाब्दभावनानेन। करणे १ वेपक्षकरणात् ६

यदा हत्वां अर्थवादमंत्रयोर्वास्तुतिस्मृत्यामुपयोगी कथितेऽर्थाद्विधेरपि सामान्यसिद्धमुपयोगित्वं
साक्षाद्विधानेन विशेषरूपेणाख्यापितं भवतीत्यभिप्रायः। औदुंबराधिकरणे वा विध्युपयोगः प्रति
ने पाद्य इत्यभिप्रायः॥ अत्रास्मिन्नेव सूत्रे विध्यतिरिक्तानां सर्वेषामानर्थक्यं पूर्वपक्षी आक्षिपते। सि
2 द्धांते तु स्वाध्यायविधिवशादेवार्थवत्तया भवितव्यमिति तावत्साधारण्येनैवाभिधास्यते।
पश्चात्तु क्रमेण स्तुत्याद्युपयोग इति वेदितव्यं। तत्र प्रथममर्थवादेष्वेव सिद्धांतकथनात्तानेवो
त्पत्तिं १ दाहरति। वायुर्वै क्षेपिष्ठा देवतेत्येवमादीनि यानि विधिभावनातदंशत्रयातिरिक्तार्थानि ता
निकिंधर्मे प्रमाणमुतनेति संशयः। तदर्थमिदं विचारयितव्यं किं विध्युद्देशेनैषामेकवाक्यत्वमुतभिन्नवा
क्य तेति तस्मिन्नर्थमप्येतच्चिंतनीयं किं विध्युद्देशार्थवादयोः परस्पराकांक्षास्ति न वेति संशयः
तत्रैवं पूर्वपक्षः। अर्थवादा निराकांक्षा भूतार्थप्रतिपादनात्। विध्युद्देशाः समाप्यंते विशिष्टा राम
र्थविधानतः। यथा श्रुतिगृहीतानि तावत्संतमसंतं वा भूतमर्थमन्याचक्षते न धर्माधर्मौ निश्चा २
...वार्थः। एवमन्येऽपि ४

२

ध्याहारादिभिस्तत्प्रतिपादनमपरिपूर्णो हि खल्वध्याहारः परिपूर्णान्निश्चैतानि सद्रूपेण भूतिंगम
यन्तीति विशिष्टार्थप्रतिपादनादर्थान्तराकांक्षाभावादनाकांक्षत्वादेव न सन्निहितेनापि वाप
क्यन्वेतमालभेतेत्यनेनैकवाक्यता विशिष्टार्थप्रतिपादनमेव हि पदानां लोके कार्यमवधारि
तं न प्रयोजनवदर्थप्रतिपादनं येन तल्लिप्सया विध्येकवाक्यता कल्प्येत। आख्यायिकारूपा
णां बहूनामुपलब्धेर्लोके। स्वाध्यायविधिवशाद्वेदस्य कृत्स्नस्य प्रयोजनवदर्थपर्यवसान
मिति चेत्। न। दृष्टोऽर्थः सोऽनानुसर्तव्यो न तद्दर्शनार्थकत्वेनातद्दूरमदृष्टार्थताध्ययनस्येत्यतस्ताव नच
दर्थवादानामाकांक्षा नापि विध्युद्देशस्यैतस्यापि विशिष्टभावनाविधानेन निराकांक्षत्वात्। न
च प्रवर्तनाय प्राशस्त्यापेक्षा विधित एवानपेक्षासमीहितसाधनभावावगमेन प्रवृत्तिसिद्धेः॥
न चार्थवादैः प्राशस्त्यं प्रतिपाद्यते भूतार्थमात्रप्रतिपादनात्। लक्षणया हि तेभ्यः प्राशस्त्यं
मेयतां न च श्रौतस्यार्थस्य संभवे सा युक्ता। एकवाक्यतया च लक्षणास्यात्। न च तस्याः प्रमाण

दृष्टोर्थः शक्तिरूपः ॥३॥ अर्थकल्पनाऽशोकस्य शाकपल्लंकल्पनेति यावत् । परंपरया शाब्दशक्त्यैव लभ्या ॥ ह्यश्चि
कोपि दृष्टस्ताहृदृश्यत इति ।

3 मस्तीति तस्मान्न प्रमाणं । एवं मंत्रनामधेययोरपि दर्शयितव्यं । ताभ्यामपि धर्माधर्मप्रमितिस्तु उदयाने
स्मादेषामप्रामाण्ये तेन न समस्तो वेदः प्रमाणमित्यवधारणं सिद्ध्यतीति ॥ ॥ अत्रोच्यते ॥ ॥
विधिनात्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः ॥ ॥ स्वाध्यायविधिना वेदः पुरुषार्थायनीयते स
र्वस्तेनार्थवादानां प्राशस्त्येन प्रमाणता । स्वाध्यायाध्ययनविधिना दृष्टार्थत्वात् सकलस्य वेदस्य प्र
योजनवदर्थपर्यवसाने बोधितमर्थवादानां चभूतार्थप्रतिपादनेन प्रयोजनानवाप्तेर्यस्तुते
लक्ष्यमाणः क्षिप्रदेवतासाध्यं कर्म क्षिप्रमेव फलं दास्यतीति प्राशस्त्यरूपोर्थः स्तोतेंतरप्रवृत्तविध्य
दृष्टाकांक्षितत्वादाकांक्षां शमयतीति पूरयि [illegible] तुमिति गम्यते । स्वाध्यायवि स ४
धिरेव प्रयोजनवदर्थपर्यवसानं बोधयन्प्राशस्त्यपरतया विना तदनुपपत्तेः तात्पर्यमेषां ग
मयति । तात्पर्याच्च लक्षणासिद्धिः ततश्चैकवाक्यत्वं । यत्तु दृष्टोर्थः स्वाध्यायाध्ययनविधिनानुस राम
र्त्तव्यो न तद्दृष्टेनार्थकल्पनेत्युक्तं सत्यं लाक्षणिकोप्यर्थो दृष्ट एवादृश्यते वहि श्रोतार्थद्वारे २

एवंच हितसाधनत्वधियारुचौजननीयायां गुणकथनेन वलवदनिष्टाननुबंधित्वबोधनाद्दूषणनिरासेऽर्थवादोपयोग इति महासाचीते

ण तत्संबंधपर्यातरे प्रत्ययः स्यं भवति स्तोत्र पक्षे तात्पर्यभावान्न लक्षणां गीक्रीयते अत्र च स्वाध्यायवि
धिनाऽर्थवादस्यापि पुरुषार्थपर्यवसानबोधनात्परं परया विहपला मे स्वर्गादि कल्पनानुपपत्तेः।
भूतार्थमात्रस्याप्रयोजनत्वात् प्राशस्त्यपरत्वं लक्षणयांऽगीक्रियते। न हि पुरुषप्रवर्तनाय विधि
रपेक्षते। यतु स्वयमेव विधिः समीहितसाधनतां बोधयन्नलमेवानपेक्षः प्रवर्तयितुमित्युक्ते
तत्वोच्यते॥ सत्यं विधिरेव प्रधानं प्रवृत्तिकारणं तस्यैवानुग्राहिका प्राशस्त्यावगतिः। फले
हि निसर्गसुंदरे स्वयमेव लिप्सा भवति। न साधने तु दुःखकरे स्य तस्मावहुष९वा विशप्तं तु
साधने प्रवर्तमानस्य तत्रैव रुच्या भवितव्यं। हितसाधनतावगतिरपि तत्रैव रुचिं जनयंती
प्रवृत्तिहेतुः स्यात् नान्यथा। सा च पुरुषेभ्यः प्रमादालस्यादियुक्तेभ्यः कर्मदुःखात्मकं रोचयं
ती गुणकथनमपेक्षते। अवगतसमीहितसाधनभावमपि कर्म तु चित्तगोचरं॥ सततं
मंतां वा गुणानां कीर्तनाद् वरोचते तेन रामितिसर्वजनानमेतत्तदेवं विधीनामध्ययनविधि
स

स्वो वास्थितो न व्यापारः। मंत्राणां तु स्वाभिधेयकशब्दकल्पना द्वारा स्वविशिष्टधर्मप्रतीतो व्यापार इति वैषम्यादिति
मदोषस्थिताः पदार्था एव लक्षणया वाक्यार्थप्रमितिं जनयंति। सानः।

वशेनैव दृष्टपुरुषप्रवर्त्तने प्रवर्तमानानां ॐ विकरप्राशस्त्यापेक्षत्वात्। दर्थवादानां च तद्वशेनैव
प्रयोजनमपेक्षमाणानां प्राशस्त्यपरत्वेन मिथोन्वय इति विधिनार्थसहैककार्यकरत्वात् तद्देवा
र्थवादानामपि सिद्धं प्रामाण्यं। एवं मंत्राणामपि स्वाध्यायविधिवशादेव प्रयोजनवत्त्वावगमा
द्विधिस्तुत्योश्च द्वितीये ध्याये निराकरिष्यमाणत्वात् प्रकरणादिवशेन प्रधानांगमूतानां दृ
ष्टमदृष्टं वा प्रयोजनं कल्प्यत इति नाप्रामाण्यं नन्वेवमंगत्वेपि प्रयोजनं लभ्येत न तु प्राम
ण्यं॥ ॥नैष दोषः॥ पदार्थानां वाक्यार्थप्रामाण्याभ्युपगमात्। उक्तं हि पदार्थास्तु मितिर्वा स्या
दितीति तेन मंत्रविशिष्टं स्वार्थं बोधयतः प्रधानवाक्यस्यार्थे मंत्राणामपि प्रामाण्यं संभवतीति तेन
मंत्राणामपि प्रयोजनवत्त्वात् प्रामाण्यमस्तीत्येतावत् सिद्धं। प्रयोजनविशेषस्तु प्रस्तुतमर्थवदाधि
करणं समाप्य वक्ष्यते। तथानामधेयस्यापीति सिद्धं सकलस्य वेदस्य प्रामाण्यं॥ ॥विधि
र्वा स्यादपूर्वत्वाद्वादमात्रं ह्यनर्थकं। पूर्वोक्ताक्षेपेण विदमारभ्यते। यदुक्तं नानर्थक्यमर्थव
प्रयोजनं तु पूर्वपक्षे रात्रिसत्रादौ विश्वजिन्न्यायात् स्वर्गफलं कल्प्यं सिद्धांते तु आर्थवादिकफलसिद्धि
रित्याद्यूह्यं।

प्रयोजनवत्त्वं
नाम प्रतीति
करणत्वरूपं
प्रामाण्यं नाम
प्रतीतिनिष्ठप्रमि
तानिति

वाक्यार्थप्रमाण
मितिशेषः

राम

भवनकर्त्तृत्वेनावगतौदुंबरताया एव भावनाकर्मत्वोचितात्वात् दृष्टा भवतीसत्रघटस्येवेत्यर्थः ९

रु:

दानामितितदनुगच्छामः स्मात्सर्थत्वंतु केषुचिन्नमध्यामहे। यथा औदुंबरो यूपो भवतीत्यत्र औ
दुंबरत्वं कथं श्रावत्ऊर्ज्जो वा स्मा ऊर्ज्जं पशुनाप्नोति ऊर्ज्जो विरुध्या इत्येवमादिषु विधिसंभवादि
त्येवमाक्षिप्यते अत्रैवं विचार्यते। किमौदुंबरो यूपो भवतीत्यौदुंबरताया ऊर्ज्जो[illegible]रुध्या इतिफ
लं। ऊतसर्वोऽयमर्थवाद इति। तदर्थं च किमेवं जातीयकेन विधिविभक्तिरहितेन साधनं वा औ
दुंबरतायाः शक्यते प्रतिपादयितुं न वेति। तत्रैवं पूर्वः पक्षः। ऊर्ज्जं पशूनाप्नोति ऊर्ज्जो विरुध्या इत्य
नेन पशूनां साध्यत्वं गम्यते फलत्वलक्षणया हि प्राशस्त्यं फलविधौ चार्थो वर्त्तमानर्थवपमर्थ
वादत्वे साध्यस्य च साधनापेक्षत्वात् सन्निधावुच्चरितमौदुंबरत्वमसत्यपि विधौ साधनत्वे
नावगम्यते। साधनतावगमादेव प्रवृत्तिसिद्धेर्नार्थो विधिनेति॥ ॥सिद्धान्तस्तु। विधावस
तिभावनायाः औदुंबरताभवनायाः औदुंबरताभवनाक्षिप्तायाः सैव भाव्यस्यात्र फलं
सन्निहिता च सा विप्रकृष्टफलांऽऽतोऽपि न फलसंबंधः। तेन यद्यपि तावदूर्ज्जं पशूनाप्नोति

पुरुषप्रवर्त्तेः

शक्यते चेत् ऊ
र्ज्जो विरुध्या इत्ये
तत्फलत्वसम
र्पकं न वेत्येति
विनाशमोः फल
फलिभावः

धर्मप्रमापकत्वं
तदभावः

अनपेक्षितत्वादनूदितं
स[illegible]स्यादित्यर्थः

वत्तुध्या इत्यनेन फलमभिधातुं शक्यते तथाप्यविहितस्यौदुंबरत्वस्य फलवचनमनर्थकमित्यर्थ
वादत एवात्र विधिस्तु न्नेतव्यः। न चैतस्मोत्तिलेन विधिशक्तिमुपजनयत्युनस्तेनैव फलं कल्प
ना संभवति। वाक्यभेदप्रसंगात्। तस्मादर्थवादः। न चैवं विधेन कामशब्दरहितेन शक्य
ते फलं प्रतिपादयितुमिति परमप्यधिकरणेव स्यात्। अत्र तु साधनांशविचारमुखेना
र्थवादत्वमुक्तं। तत्र चं तु साध्यांशविचार इत्यपौनरुक्त्यं। अथवा साध्यांशोप्यत्रैव विचारितेरात्रि
सत्रन्यायेन फलपरत्वमपापश्लोकश्रवणादीनामाशंक्य निराकरिष्यते चतुर्थे। न चौदुंबरता
याः फले विधीयमानो यागाश्रयो लभ्यते। तत्र वाक्यादेवाश्रयकल्पनायां वाक्यभेदः। पशु
यागो हि प्रकृतः स तावदयोग्यः। यत्र हि गुणः कारकतामापद्यते स आश्रयः। यथा होमो दध्नः।
न चौदुंबरता शक्नोति यागे कारकीभवितुं तदाश्रयत्वे च स्रपयहत्वानर्थक्यं अनुवादासं
भवात्। यत्तु पशुनियोजनं यूपद्वारेण योग्यं तदपि सह यूपेनैवाप्रकृतं। न च प्रकृतिवद्भावे

नियोजनविशिष्टयूपसंबंधस्यार्थः ३

नतस्य सन्निधिसंभवः। स हि प्राकृतमिष्टं भावं सामान्येन सन्निधापयति न तत्र यूपस्य स्वरूपेण
विपरिवृत्तिरस्ति। अविपरिवर्त्तितं च न शक्नोति आश्रयाकांक्षां पूरयितुं तादृशी विपरिवृत्तिर्जुहू
दीनामप्यस्तीति तेषामप्याश्रयत्वं स्यात्। तत्र तथैव यूपग्रहणमनर्थकं। तत्र च वाक्येनैवाश्रयसं का०१
बंधे फलसंबंधे च विधीयमाने वाक्यभेदः। एकदेशिनां तु वाक्येनैवाश्रयसंबंधं फलसंबंधं
च गुणाधिकारे अभ्युपगच्छतामिहापि तथैव संभवात् यत् एकेन वाक्येन संबंधद्वयासंभवाद
प्रामाण्यमाशंक्यते तन्निरासाय स्तुत्यर्थत्वमापादितं तदनर्थकम्। आकांक्षित्वा हि यूपत्वस्यादृष्ट
त्वात् संबंधो दधिहोमसंबंधवन्नालौकिकतो लभ्यते। ततस्तस्य फलसंबंधस्य चैकस्माद्वाक्या
त्सिद्धिरिति। तदसत्। यद्यपि यूपत्वमदृष्टं तेन तु निमित्तेन यस्मिन् काष्ठे यूपशब्दो वर्त्तते
तस्य चौदुंबरत्वात् अलौकिक एव संबंधः। यदि चैवं न लभ्यते खादिरं वीर्यकामस्य यूपं कु
र्यादित्यत्रापि एकवाक्यता न स्यात्। अस्तु तत्र वाक्यभेद इति चेन्न। वार्त्तमेतत्। एकवाक्यत्व

इति आकरणिकवाक्यस्योपक्षयात् उक्थ्यसंस्थायां नकल्प्येत। एवं यत्कामो व्यर्थं दस्याद्वादशाहेन जोऽन सोऽनेन
कामः समध्यत इति विधीयमानो लोकिकव्यूढत्वेन तत्राग्नाविशाभस्तूपे ऐन्द्रवायववाग्रे प्रायणीयादयनीयो
रुपादशानामनामे ऐन्द्रवायववाग्रग्रहमहः अथ च क्रामन्यत्र अग्रयणाग्रे इत्यादिवाक्यस्योपक्ष
वगमात् यदि चार्थे कस्मिन्नाख्यातेवा कथमेदस्तथासति औदुम्बरो यूपो भवति ऊर्जो वा अन्नमौदुम्बरो
रव्यात् तद्वेपेस्तुतरांवाक्यभेदप्रामाण्यं च संभवतीति दूरापेतमप्रामाण्यं। अथ खादिरो यूपो भ
वति स्येत द्वाक्यविहितयूपसंबन्धाश्रयेण न फलसंबन्धविधिर्यः खादिरो यूपः स वीर्यकाम
स्येति। तथासति। तथासति खादिरत्वं नकेवलार्थं स्यात्। उक्थ्यादिवत् व्यूढवच्च फलार्थमेव स्या
त्। उभयार्थं चेत्तदिष्टं खादिरवत् उभयार्थता दधिग्रहस्य वदतो निबन्धनेकारस्यापि। तस्मा
द्यूपाश्रितस्य खादिरत्वस्येवौदुम्बरत्वस्य फलार्थविधिसंभवात् प्रामाण्यशंकेत्यास्तां
वत्। तस्मादौदुम्बरतायूपोद्देशेन विधीयते तत्स्तुतिरियं ऊर्जो वरुध्या इतिसिद्धं॥ हेतुर्वास्य
दर्थवत्त्वापपत्तिभ्यां स्वर्गमानर्थक्यप्रतिपादिनो विधिप्रतियोगिनश्चार्थवादा विचारिताः
॥इदानीं हेतुप्रतियोगिनो विचार्यन्ते॥ ॥एवं श्रूयते। शूर्पेण जुहोति तेन ह्यन्नं क्रियत इति
तत्र संदेहः। किं शूर्पेण होमे कर्त्तव्ये अन्नकरणता हेतुः उतार्थवाद इति। तत्र हि शब्दश्चास्य हेतुत्वं
तस्य कृत्यर्थतातद्वादित्यर्थः। दधिग्रहस्यति [illegible] ग्रहकीयात् पशुकामस्येति चाविहितस्यस्यार्थः

गम्यते। लक्षणया प्राशस्त्यं गम्यते। अनर्थकप्रायश्चार्थवादः हेतुस्त्वर्थवान्। कः पुनरर्थो हेतोः।
येनयेनान्नं क्रियते शूर्पेण दर्विपिठरादिना तेनापि होमप्रसिद्धिर्हेतोः प्रयोजनं कथमप्र
सिद्धायां व्याप्तौ हेतुव्य[illegible]पदेशः। अत एव हेतुनिर्देशाद्व्याप्तिमन्तरेणानुपपद्यमानात् व्या
प्तिवचनं कल्प्यते। येनयेनान्नं क्रियते तेन होतव्यमिति। तेन वचनेन सर्वान्नकरणविध्योपि
नाः शूर्पस्यापि होमसाधनत्वसिद्धेः शूर्पेण जुहोतीत्ययमप्यनुवादः। तेन दृष्टमिदं वाक्यं श्रु
तानुमितैकदेशनिष्पन्नं शूर्पस्य होमसाधनत्वं अन्नकरणत्वाद्धेतोः। अतः शूर्पमन्यदपि यद
दन्नकरणं तेन होतव्यमिति पूर्वः पक्षः। सिद्धान्तस्तु। शूर्पस्य तावद्यथा श्रुत्याकरणत्वं गम्यते
न तथानुमानिकैर्दर्विपिठरादिभिर्विकल्पितुमर्हति। न च वेदेनोच्यमानं शूर्पस्य होमसाध
नत्वं हेतुमपेक्षते। वेदस्यैव तत्त्वप्रमाणत्वादर्थवादस्त्वपेक्षितः प्ररोचनार्थत्वेन तस्मादर्थवाद
त्वात् एवं चाप्रसिद्धव्याप्तिवचनकल्पनाक्लेशो न भविष्यति। क्रियत इति चावर्त्तमाने वर्त्तमान

अधिकार्थलाभस्य निरसनीनो लक्षणाश्रयणे हेतुमाह नचेति २
प्रयोजनमित्युक्तम्

निर्देशः प्ररोचनार्थत्वे युक्तो भवति न हि भूते भाविनि वा तादृशी प्रीतिः यादृशी वर्त्तमाने तेन स्तुत्यर्थेन
लक्षणया वर्त्तमाननिर्देशो युक्तः विध्यर्थत्वे तु निष्प्रयोजनं लक्षणाश्रयणं ॥ न चैष्टो तेन वर्त्त
अंनकरणे न मानान्त्रौ क्रियेण शक्यते होमः कर्तुं तस्मादर्थवादत्वं ॥ ॥ तदर्थशास्त्रात् आगतोऽर्थवादप्रसंगः मं
त्रेष्विदानीं चिंत्यते तेषामप्याद्येऽधिकरणे आनर्थक्यमाशंक्य स्वाध्यायविधिसिद्धोऽनार्थवत्तया भवित
व्यमित्येतावदपर्यवसितं कल्पितं तत्पर्यवसानायेदानीमर्थविशेषश्चिन्त्यते तत्र पांचक्रमप्रकर
णाभ्यां क्रतुसंगतत्वं भवत्विति किं दृष्टेनैवार्थप्रकाशनोपकारेण भवति किमुच्चारणमात्रेणादृष्टं
कुर्वंतास्मिति तत्र यदि दृष्टार्थत्वेव स्यात् मंत्राम्नानमनर्थकं प्रसापनादृष्टं चेत् तदुच्चारणतो
वराशक्यते सुपायांतरेण विप्रयोगवेलायामर्थप्रकाशनं तदि तावन्मात्रेणैव मंत्राणां कार्य
त्वं स्यात् । नित्यवदाम्नानमानर्थकं स्यात् । अथ तु मंत्रप्रसापनादृष्टं कल्प्यते ततो दूरमभिवि रामु
गता कल्प्यमदृष्टं तदुच्चारणादेव कल्पयितुं युक्तं तद्धि पुरुषव्यापारगोचरः । प्रत्यायनं तु
५ प्रकरणेन क्रतुसंगतत्वं क्रमेण तत्र स्मर्य [illegible] र्थवतिः ।

x उपलक्षणं चैतल्लिंगादीनां १

इमामगृभ्णन्नित्यस्य परिसंख्यानां चतुर्भिरिति विवेच्य पूर्वं उरु प्रथस्वेति पुरोडाशं प्रथयतीत्यस्यार्थवादत्वं
लिंगकल्पिततया मंत्रविधिस्तस्यायमर्थवाद इति वक्तव्यं। न च तत्संभवति। आम्नातोपस्थितस्य मंत्रसमान
कल्पितविध्यपेक्षया भिन्नदेशत्वेन तदर्थवादत्वानुपपत्तेः। अतः क्लेशेन तदुपपादने न द्वेषः स्यात्। ननु स्मृ

स्मिन्ननुष्ठिते स्वयमेव भवति स्वव्यापारगोचरे च पुरुषो नियुज्यते। यत्र च नियुज्यते तत्र फलाका
ङ्क्षा तेन यावश्यं भाविन्य दृष्टकल्पना सा तत्रैव युक्ता। न तु तस्य प्रयापनार्थं वं प्रसाधयने चाद
ष्टार्थमिति युक्तं। तस्माद् दृष्टार्था मंत्राः तथा च तदर्थशास्त्राद्युपपत्तिः। इतरथा परिसंख्याया
श्रयणे दोषः स्यादिति। अत्राभिधीयते। यस्य दृष्टं न लभ्येत तस्या तस्या दृष्टकल्पना। अनु
ष्ठेयस्मृत्तेश्चेह मंत्रोच्चारणमर्थवत्तास्मरणं च प्रयोगार्थं प्रयोगाच्च फलोदयः। एवं दृष्टार्थता
लाभान्नादृष्टपरिकल्पना। यस्तु मंत्रैरेव स्मर्तव्यमिति नियमः तस्य न किंचिद् दृष्टमस्तीति
दृष्टं कल्प्यते। मंत्रोच्चारणस्य तु दृष्टेनैवार्थवत्ता तत्रानुपपत्त्येकशरणमदृष्टकल्पनमनवका
शं। तदर्थशास्त्रादयो हि गुणार्थवादपरिसंख्यादिभिः परिहृताः। तस्मात्प्रकाशनेनैव
मंत्राणामुपकारिता। उपायनियमादेव वदृष्टपरिकल्पनं॥ ॥इति शास्त्रदीपिकायां प्रथ
मस्याध्यायस्य द्वितीयः पादः॥ धर्मस्य शब्दमूलत्वादशब्दमनपेक्षं स्यात्। कथं लक्ष
तरेण संभवानां आम्नानमनर्थकं स्यादि... अष्टाशं ... नियमार्थ त्वान्नमंत्राम्नानानर्थक्यमिसाशयेनाह
स्त्विति गुणार्थेति। चतुष्टसंख्याया... यस्येति पुरोडाशं प्रथयतीत्यस्य
भिन्नदेशतया मंत्रलिंगकल्प्यविधिशेषत्वासंभवेपि अत्रैव नान्यो पुरोडाशं प्रथयतीत्यशेन पुरोडा

वचनस्य स्ववचनेन विनियोगाद् प्रामाण्यपरिसंख्यामिति मन्त्रे दोषमिति तस्यैव परिहृतमिति स्वपक्षः। न पूर्वं स्मारक च मात्रेण कथ
मानधिगतार्थगन्तृत्वरूपप्रामाण्यमिति साशंकस्मीत्र वर्णिकदेवतास्मृतौ कर्पूरादीनां सिद्धत्वात् द्विशिष्टधर्म
प्रामस्य प्रयोगितयोः प्रामाण्यसिद्धिरिति साशयेनोपसंहरामि। तस्मादिति॥ पूर्वपक्षस्य शोधः॥ न्व

लोधर्म इत्येतदिह लक्षणार्थ इत्युक्तं। तत्र प्रथमे पादे चोदनाप्रामाण्यं सिद्धं द्वितीये त्वर्थवाद
देः। एवं कृत्स्नस्य वेदस्य प्रामाण्यमुक्तं। इदानीं पौरुषेयीषु स्मृतिष्वाचारेषु च वैदिकपरि
गृहीतेषु चिन्ता। यद्यपि चोदनाप्रामाण्यमप्रामाण्येपि स्मृतीनां न विहन्यते। तथापि कि
४ त लक्षणो धर्म इति जिज्ञासाधिकारात् स्मृतिप्रामाण्यं लक्षणे संगतं। यत्तु। ननु प्रामाण्ये पत्र ४
स्मृतीनां वेदस्यापि तत्सापेक्षत्वाद् प्रामाण्यं स्यात्। यां जनाः प्रतिनंदंतीत्ययं मंत्रो रा
त्रिदेवत्यकर्मांगत्वेन प्रतीयते। स्मार्त्तं च कर्म रात्रिदैवतमिति तदपेक्षस्य मंत्रस्य तदप्रा
माण्याद् प्रामाण्यं स्यात्। तत्सामान्यादितरेषु तथात्वमिति सकलस्य वेदस्याप्रामाण्यं। तेन
वेदप्रामाण्यसिद्ध्यर्थं स्मृतिप्रामाण्यमिति संगतिः। नैतदेवं। यदा हि स्मृतेरप्रामाण्यं तदा
मंत्रस्य स्मार्त्तकर्मांगत्वे किं प्रमाणं न तावल्लिंगं तस्य सामान्यसंबंधप्रमाणसापेक्षत्वा राम
त्। नापि स्मृतिवाक्यं तस्याप्रामाण्यात्। यद्यपि च लिंगमात्रं विनियोजकं स्यात्तथापि प्र

व त्वेदंगत्वेनाफलस्यविनियोगाच्च स्मृत्यप्रामाण्येच स्मार्त्तस्यकर्मणः फलवत्वाभावान्नता
दर्थ्यं मंत्रस्य येन सापेक्षतास्यात्। सत्यपि च मंत्राप्रामाण्ये सकलस्याप्रामाण्यं नुक्तत्वं नहि
मंत्रस्य स्वारसिकमप्रामाण्यं येनेशब्दमात्रे स्यादपितु सापेक्षत्वे कवाक्यतावक्तां नक्त स्मृ
स्य तदस्तीति कथमप्रामाण्यं। तस्मान्नैवं संगतिः संभवतीति पूर्वोक्तैव संगतिर्ज्यायसी॥
धर्मप्रमाणचिंताधिकारात्स्मृतीनामपि प्रामाण्यं प्रतिपाद्यत इति। न चैवं चोदनैव प्रमा
ण मिति प्रतिज्ञाव्याकोपः तन्मूलत्वेन तदंतर्भावेन बुतरेषां प्रामाण्यानुख्याते रेषप्राम
ण्याभावात्तदिह किं स्मृत्याचाराणां धर्मे प्रामाण्यमुतनेति विचार्यते तदर्थं च श्रुतिमूलत्व
मेषां भ्रांत्यादिमूलत्वं वेति विचारयितव्यं। तत्र प्रायेणानृतवादित्वात्पुंसां भ्रांत्यादि संभव
त्। चोदनोनुपलब्धेश्च श्रद्धामात्रात्प्रमाणता। संभवद्भ्रमविप्रलंभेषु पुरुषेषु नताचन्नि
र्विचिकित्स मेव प्रामाण्यं स्वध्यावसानं। अतश्चाननुष्ठाना फलनोऽप्रामाण्य मेवं किंचैत्रै

सुहृत स्मातं कलयस्मृतिमूलभूताः पठिताः संप्रत्युत्सन्ना इति। तत्र सहस्रं साम शाखाः। एकशतमध्वर्यु
शाखाः। एकविंशतिशाखं बाह्वृच्यं ×६

षां प्रत्यक्षादिमूलत्वेन प्रामाण्यं तेषां धर्माधर्मयोरप्रवृत्तेः। न स्यात् तं त्रयाणां वेदवदपौरुषेय
त्वात्। न चोदनामूलत्वेन तदनुपलंभात्। न चानुपलभ्यमानाः चोदनाः स्वप्रमेयं प्रति
पादयंति। न चासां प्रत्यक्षेणोपलंभसंभवः अनुच्चार्यमाणत्वात्। उच्चार्यमाणत्वे वास्मृ
तिप्रणयनवैयर्थ्यं। प्राक् पठिता अपि संप्रति पुरुषस्त्याद्युत्सन्ना इति चेत्। न विकल्पासहत्वात्। न्या४
यो ह्युत्सादं चोदनानां वदति स वक्तव्यः किमेकाकाचिच्छाखा समात्ते श्रुतिसंख्यानानामिका पूर्व त५
मासीत् सा चेदानीमध्येतृक्षयादुत्सन्नेति कल्प्यते। किं वा बह्वीषु शाखास्वित्यादि शाखापरिमाण
स्य परंपरया सर्वलोकस्मरणान्नानोधिका शाखासंभावयितुं शक्यते। नापि पद्यमानानां
मत्यंतावहिताध्येतृकाणां मध्ये कासांचिच्चोदनानामुत्सादसंभवः। न च संप्रत्यपि पद्यंते
एवं विप्रकीर्णासु शाखास्वित तत्स्मृतिमूलभूताः श्रुतय इति युक्तं। स्मृतिप्रणयनवैयर्थ्या राम
दियुक्तं। न तावदिदानीमतीतकाले वा पठिताः श्रुतयः स्मृतीनां मूलं। नापि नित्यानुमेयाः श्र

धपरं परान्यायात् । याहि चोदना न कथंचिदुच्चार्यते । तस्याः सर्वपुरुषप्रत्यक्षादिप्रसराभावा
त् दुर्लभमंतरमस्ति । सा न नु स्मृतिलक्षणलिंगवशेनानुमानं प्रसरत्येव सर्वेषां लिंगादिकल्प्या
श्रुतिपु स्त्विवं विषयमप्यन्योऽसः लिंगादयो हि सर्वपुरुषप्रत्यक्षविषयाः श्रुतिमंतरेणानुपपद्यमानाः
युक्तं यत्तस्या निश्चयमादध्यातिस्मृतिवाक्यरचनानुपौरुषेयीयदर्थविषयोपलभ्यते तद्वि
षयमेव रचयितु ज्ञानं कल्पयति अष्टकाकर्तव्यताविषयं च स्मृतिवाक्यमिति नून मयम
ष्टकाकर्तव्यतां वेदस्ये तावत्प्रथमं कल्प्यते । न श्रुतिस्वरूपं नापि श्रुतिज्ञानं । एवमर्थज्ञाने
स्मृतिकारस्य कल्पिते पश्चात् ज्ञानलिंगात् ज्ञेयभूतार्थानुमानं न श्रुतिकल्पनां । एवं स्मृ
तिकारस्यापि स्मृत्यंतरलिंगादर्थएवानुमानमिति निःप्रामाणिका श्रुतिकल्पना स्यात् ।
अथोच्येत न खलु पौरुषेयेन ज्ञानेन ज्ञानेन ऊढित्वे वार्थनिर्णयः । मूलानुसंधानसापेक्ष
त्वात् । तच यदि स्मृतिकारस्यार्थविषयज्ञानमूलमनुसंदधानः स्मृत्यंतरमेव संभावयेत् ।

10

तदपि ज्ञानस्यैव लिंगं नार्थस्य। एवं ततः पूर्वतरमपि स्मरणं ज्ञानस्यैव लिंगं नार्थस्येति न
क्वचिदप्यर्थनिश्चयो लैंगिकोऽलभ्यत इति श्रुतिरेव कल्पयितव्या यद्येवं श्रुतावपि [redacted] तुल्यमेवैतत्। स्मृतिकारस्य मूलतया श्रुतिज्ञानमेवद्य
मं कल्प्यते न श्रुतिसद्भावः। श्रुतिविषयेण तु ज्ञानेन ज्ञेयभूतश्रुतिनिर्णयः। परज्ञानेन च त
द्विषयश्रुतिनिश्चयो मूलानुसंधानसापेक्षः। मूले च स्मृति [redacted]
कारस्य स्मृत्यंतरमेव तदपि चार्थज्ञानद्वारेण श्रुतिज्ञानस्यैव लिंगं न श्रुतिसद्भावस्येति न
क्वचित्कस्यचिदपि श्रुतिसद्भावनिश्चयो लैंगिको लभ्यते। लिंगादीनि तु श्रुतिसद्भावं कल्पयं
तीत्युक्तो विशेषः। तेन यदि परकीयेन ज्ञानेन प्रागेवार्थनिश्चयः ततोऽर्थस्मरणपरंपर राम १०
यार्थस्यैवानुमानान्न श्रुतिसिद्धिः॥ ॥अथ स्मृत्यंतरमेव मूलं स्यात्। तत्राप्यंधपरंपरया
च रूपनिश्चयस्तादास्यात्। चेत् एवं द्रमादीनामपि पुंवाक्यपरंपराधर्मानुमानं स्यात्।

अथ मूलश्रुत्यनुसंधानापेक्षं तत्तो यथैव वयं मानवीयात्स्मरणान्मनोरर्थविषयं च ज्ञान
मात्रं कल्पयिष्यामः श्रुतिसद्भावमनिश्चित्य तन्निश्चयाय मनोः श्रुतिसद्भावमूलं प्रमाणं मृगया
महे तथा मनुरप्यन्यस्य सोऽप्यन्यस्येति न श्रुतिसद्भावसिद्धिः एवमुत्तरयथापि श्रुतिर्नित्यानु
मेया न सिद्ध्यतीति न तन्मूलत्वेन प्रामाण्यं स्मृतीनां अतः श्रद्धामात्रविजृंभितं स्मृतिप्रामाण्य
मिति प्राप्ते अभिधीयते। वैदिकैः स्मर्यमाणत्वात्तत्परिग्रहदार्ढ्यतः। संभाव्यवेदमूलत्वात्स्मृतीनां
वेदमूलतायेव हि वेदस्यैव धर्ममूलता नान्यस्येति आस्थितामन्वादयस्तेषामेकोऽपि धर्म
त्वस्मरणं न कथंचिदुपपद्यते न यदि वेदमूलता तथा वैदिकानामेवाविगीतपरंपरया परि
ग्रहो वैदिकत्वस्मरणं च शिष्टानां नास्ति वेदमूलत्वे च कल्प्यते। संभवति च तत्रैव वैदिकानां
वेदसंयोग इति तन्मूलत्वमेवाध्यवसीयते। कथमनुच्चरितानां मूलत्वोपपत्तिरिति चेत् उच्या
यन्त एव स्मृतिमूलभूताः श्रुतयः संप्रत्यपि विप्रकीर्णाः काश्चित्क्वचित्कस्यांचिच्छाखायां वि

प्रकीर्णशाखान्तराध्यायिभिः शाखान्तरगतानामनुपलंभात्तदर्थोनार्थवत्वनिबंधनमुपत्ते
रेवविवाभेदधीभिरनुपसंहरणीयानामुपसंहारफलं स्मृतिप्रणयनमिति नवेदार्थमतः
स्मृतयः प्रमाणमिति सिद्धं ॥ ॥ विरोधेत्वनपेक्षंस्यादसतिह्यनुमानं उत्सर्गस्य स्मृतिप्रामा उत्सर्गतः प्राम
ण्यस्यापवादः क्रियते अत्र प्रत्यक्षश्रुतिविरुद्धाः स्मृतीरुदाहृत्य चिंत्यते। किं प्रमाणमप्रमाण ण्यस्य २
वेति तदर्थं च पूर्ववदेव श्रुतिमूलत्वं भ्रान्त्यादिमूलत्वं वेति चिंतनीयम् अत्र ताः पूर्वाधिकरणं समस्ता मि
पूर्वः पक्षः न च प्रत्यक्षश्रुतिविरोधात् स्मार्तश्रुतिकल्पनानवक्लृप्तिः। द्वयसंभवाद्व्रीह्यादिश्रुतिवत्।
यत्र हि द्वयोरसंभवस्तत्रैकविषयेण प्रत्यक्षेणेतरविषयानुमानं प्रमेयापहारादनायासेन निरा
क्रियते वक्ताविवक्षितत्वात् अनुमानं यत्र तु द्वयसंभवः तत्र शीघ्रप्रवृत्तमपीतरन्नेतरस्य विषयमप राम
हरतीति तद्विषयमनुमानं न शक्नोति प्रतिषेद्धुं संभावति च युगपदनुपसंहरणीयार्थमपि श्रु ११
तिद्वयं व्रीहियवबहिर्द्वयांतरग्रहणाग्रहणादिविषयश्रुतिवदिति प्रत्यक्षेणापि स्पर्शविधिनास
वैकल्पिक२

र्वेवेष्टनविषयश्रुत्यनुमानेनतथा व्यंनिराकर्तुं कथंतर्हिश्रुतिलिंगादिषुपूर्वपूर्वेणोत्तरोत्तरबाधः
तथापिश्रुतिद्वयसंभवान्नलक्षणयाकल्पयानिराकर्तुंशक्यते।उच्यते।नैवतत्रप्रमेयापहारनिबंधनो
नोबाधः किंतुकल्पनामूलोच्छेदात्।यावद्धिमंत्रस्मानमनवगतप्रयोजनप्रकरणोचाकांक्षः
तावदेवतत्सिद्ध्यर्थंश्रुतिकल्पनंप्रमाणवत्।यदातुलक्षणयाश्रुत्याद्वयोरपि [illegible] नैराकांक्ष्यंत
दामूलोच्छेदोकांक्षाधीनाश्रुतिकल्पनानैवोन्मज्जति।अत्रतुप्रत्यक्षयाश्रुत्यानस्मर्तेर्मूला
कांक्षानिवर्त्यते।यतोमूलोच्छेदादनुमानविरोधःस्यात्।यदिपरंप्रमेयापहाराद्यविवेकोपा
नुमानप्रत्यक्षेणाविरुद्धौ।तानचैवंसंभवति।श्रुतिद्वयसंभवात्।अन्यत्रहिशेत्योक्षाःनसंभवतःप
रस्परोपमर्दकत्वात्तयोः।अतःप्रत्यक्षेणोक्षेणशेत्यस्यापहृतत्वात्तद्विषयमनुमानमुदेतुमुत्सह
ते।अत्रतुसंभवतिश्रुतिद्वयं।व्रीहियवादिवदित्युक्तं।अपवाश्रुतिस्मृतिप्रमेयेनमिथोविरुद्धेनहि
व्रीहिशास्त्रपायवशास्त्रिर्विरुध्यतेसावातयास्यशास्त्रपावावेष्टनशक्तिःसावातयाशास्त्रमात्रेचैव उपकारयोग्यता१

प्रमेयौनमिथोविरुद्धौ।नहिव्रीहि
शास्त्रपायवशास्त्रिर्विरुध्यतेसावातया॥

८

धेः प्रमेयं अतोत्रानुमानस्य प्रत्यक्षेणाविरोधाद्द्विरूपयोर्नामपि प्रामाण्यमिति प्रमेयेभिधीयते। अप्र
माण्यं विरुद्धानामशक्यार्थविधानतः। औदुंबरीं स्पृष्ट्वोद्गायेदिति सर्वां वेष्टयितुं स्पृशन्। वेष्टितो वापि ८
संस्पृश्यते न्योन्यविरोधतः। प्रमेयापहृते रेव बाधः स्याद्धि शेषवत्। अशक्यार्थविषयता हि
भूयसीति विकल्पप्रामाण्यनिदानं विधीनां। सामरंतरे दित्यादिवैशेष्यं च संस्पर्शता वेष्टयितुं वेष्टयते
स्पृष्टुं अतो वेष्टये संस्पर्शे दित्यशक्यार्थविधानान्नतावदुभयोरपि प्रामाण्यं संभवतीत्यवश्यमन्यत
रद्बाधितव्यं ननु शक्तिमात्रं विधेः प्रमेयं। संभवति चाननुष्ठीयमानयोरपि शक्तिरिति सत्यमनु
ष्ठानविरोधे प्रमेयभूतशक्त्यविरोधादुभयोः प्रामाण्यमुपपन्नमिति नैकस्यापि बाधो युज्यते। कि
मिदानीं सामरंतरे दग्निनास्ति चेदित्यादीनामपि प्रामाण्यमुपपन्नं अननुष्ठीयमानस्यापि श
क्तिसंभवात् तथा सामान्यविशेषशास्त्रयोरपि न विरोधः स्यात्। आहवनीयपदयोरुभयोर राम
पि शक्तिसंभवादाहवनीयस्य न पदेन बाधः स्यात्। अविरुद्धस्य दुर्बलस्यापि बाधायोगात्। नच १२
ननु सर्वथाऽननुष्ठीयमानेषु शक्तिर्बाधितप्रसंग

सततदृशानुकूल्याद्वैश्यस्येति वैश्यनिमित्तकेन सामिधेनीसाम्यदृश्येन नित्यस्य तत्सोचदृश्यस्य च बाधो न स्यात्। आदिपदेन नित्यकाम्यादिसंग्रहः ४

सामान्ये प्रत्यक्षमात्रे रोत्यर्थः

अथ सादिभिरिवलिंगादीनां मूलोच्छेदेन श्रौतिकल्पनाविरोधाद्बाधसंभवः सामान्यशास्त्रस्यापि
प्रत्यक्षत्वात् तन्मात्रेण होमान्तरेष्विव पदहोमे पि आहवनीयसिद्धः। अतोऽत्र सामग्रीनिरोधासंभ
वात् प्रमेयविरोधादेव बाधोङ्गीकर्तव्यः। शक्तिमात्रे च प्रमेये तद्विरोधाभावान्न बाधः सिद्धे देवमुप
न्नुत्पन्नेशिष्ट नित्यनैमित्तिकादिषु प्रसंगो दर्शयितव्यः। तस्मादवश्यमनुष्ठानविरोधेन शास्त्रवि
रोधोङ्गीकार्यः। किं च न शक्तिमात्रं भूतार्थकथनवत् विधिनाववोध्यते प्रवर्तनारूपो हि विधिर
र्थो समीहितसाधनशक्तिं बोधयति प्रवर्तना चाशक्यविषया न संभवतीति स्यादेवाप्रामाण्यं॥
यदापि समीहितसाधनत्वे व विध्यर्थ इत्याश्रीयते तदापि न तन्मात्रं विधिः किंतु कर्तुः समीहित
साधनतानं चाशक्यार्थे कर्तृत्वं संभवतीत्यप्रामाण्यं पायथोक्तं आख्याता नाम अर्थं ब्रुवतां शक्तिः
सहकारिणीति तेनाशक्यानुष्ठानमर्थद्वयं बोधयतोः प्रमाणयोः प्रमेयविरोधादवश्यमन्य
तरद्बाधितव्यं तत्र प्रत्यक्षेणानुमानस्य बाधो ग्रावविवरोस्यानुमानस्येति सिद्धमप्रामाण्यं स्म

तीनंश्रुतिविरुद्धानांव्रीह्यादिषु तु द्वयोरपि प्रत्यक्षत्वेनागृह्यमाणविशेषत्वान्नैकेनेतरस्य बाधः संभ
वतिविरुद्धार्थत्वाच्च न द्वयोरप्यांतस्येन प्रामाण्यं नवाप्रामाण्यमविद्यमानदोषयोः संभवतीति
गत्यंतराभावादुभयोरपि पाक्षिको बाधः कल्प्यते। नचैवं शास्त्रस्याप्रामाण्यं। यथा सामान्यशास्त्र
स्य विशेषशास्त्रबाधितस्यापि नाप्रामाण्यं तद्वदिहापि ननु बाधितं भवत्यप्रामाण्यं च न भवती पं ४
13 ति व्याहतमेतत् सत्यमेवं न त्वत्र पारमार्थिकः शास्त्रार्थो बाध्यते येनाप्रामाण्यं शास्त्रस्य स्यात्।
किंतु प्रतिपक्षमनालोचयतो यः शास्त्रस्य स्वरसतः सार्वत्रिकप्रत्ययः सोऽत्र बाध्यते तदा बाधाद्
पाक्षिकानुष्ठानपरत्वं शास्त्रस्याध्यवसीयते। सामान्यशास्त्रस्येव विशेषशास्त्राक्रांतविष
यपरत्वमिति नाप्रामाण्यं। नचैवं स्मृतिवशेन श्रुतिस्वरूपभंगेन स्पर्शनस्य पाक्षिकत्वं कल्पयि टू. प्र
तुं शक्यते। स्मृतेः स्वतोऽप्रमाणत्वेन श्रुतिबाधासामर्थ्यात्। श्रुतिकल्पनस्य च प्रत्यक्षश्रुतिवि
हितस्पर्शविरोधेन विरुद्धत्वात्। ननु पाक्षिकत्वेनापि प्रत्यक्षश्रुतिरुपपद्यते। यस्मिन्पक्षे सा नास्ति तत्रास्पर्शाभावे

दृष्टस्पर्शनश्रुत्यनुगुणा सर्ववेष्टनस्मृतेः श्रुतिमूलकत्वकल्पनेत्यर्थः ६

न वेष्टनस्पर्शवाक्यानुपपत्त्या नवात् तद्विषयश्रुतिकल्पनमुपपन्नमिति चेत् न। इतरेतराश्रयात् स्वर
सतो हि श्रुतिवाक्याद् पाक्षिके स्पर्शनं गम्यते। तस्मिंश्च पाक्षिके न स्मार्तश्रुतिकल्पनमशक्यत्वा
त्। न हि स्पर्शनवेष्टयितुं शक्यते तत्र स्पर्शनस्य पाक्षिकत्वे सति श्रुत्यर्थतामासाद्य कात्स्न्येन क्रि
श्रुतिरात्मानं लभते। तस्यां च लब्धात्मिकायां तद्विरोधात् स्पर्शनस्य पाक्षिकत्वमितीतरेतराश्रय
त्वं स्यात्। ततोऽत्र श्रुत्यसंभवात् भ्रान्त्यादिमूलत्वादप्रमाणमेवं जातीयकं स्मरणं। न ह्यसंभव
च्छ्रौतादिकत्वं कस्यचिदपि शक्यमध्यवसातुं संभाव्यमाने तु भ्रान्त्यादौ दृष्टानुगुणं दृष्टकल्प
नाऽसति तु विरोधे कार्यसामान्याद्वैदिकपरिग्रहदार्ढ्याच्च श्रुत्यनुमानमिति न सर्वत्रैवकार
लोभतः ३ ण्यमिति॥ हेतुदर्शनाच्च॥ ॥अधिकरणांतरं वा। अत्र गृह्यमाणकारणश्रुत्यविरुद्धस्मरण
मुदाहरणं वैसर्जनहोमीयं वासोऽध्वर्युर्गृह्णातीत्यादिकं। तत्प्रमाणमप्रमाणं वेति विचारः
कर्तृसामान्यात् प्रत्यक्षश्रुतिविरोधाभावाच्च प्रमाणमिति प्राप्ते उच्यते। न दृष्टहेतोर्हेत्वंतरा

नुमानं प्रक्रमते दृष्टश्चाचलो न एव हेतुरिति तत एव स्मृत्युपपत्तेर्नात्यन्तापरिदृष्टवैदिकवचन
कल्पनोपपत्तिः अतः श्रुतिविरुद्धं दृष्टकारणं च स्मरणमप्रमाणं अतोऽन्यत्प्रमाणमिति॥ ॥पश्चा
चार्यैरधिकरणमेनो दर्शितं तत्रायमभिप्रायः। नैव वेदं स्मृतेर्वाधो यदि स्मृतिमूलं न कदा
चिदपि केचित्कस्यांचिद्विशाखायामुपलभ्यत इति अध्यवसातुं शक्यते। तदा हि तत्र सर्वपुरुषा
तु णामेव प्रत्यक्षे प्रसराभावात् केवलस्मर्यमानसमधिगम्यश्रुतिवाक्यमनुमानस्य प्रत्यक्षवि
रोधादनुदयात्सकलजनस्य समस्तप्रमाणोपधानेनुवर्त्तिगगनकुसुमोपमानं स्यात्। नैवे
वमध्यवसातुं शक्यं। अनंतचरणाधाराणामनेकसहस्राणां वेदशाखानां कास्मैनोपलंभा
भावादेवं चानध्यवसीयमानेस्यपि विरोधे दुर्बलत्वे न तरमप्रामाण्यं न्निसानुमेयश्रुतिमूलता राम
निराकरणात्। यदा हि शाखांतरगतानि पुरुषान्तरप्रत्यक्षाण्येव वेदवाक्यानि स्मृतीनां मू १४
लं तदा वैष्णवं वाक्यमपि पुरुषांतरप्रत्यक्षतया संभाव्यमानं कथमिव शक्यं नास्तीति वदितुं।

मलम्कस्यभावेऽनिशेषः ३

द्वेधा हि तस्याभावावधारणं बाधकप्रमाणसद्भावाद्वा साधकप्रमाणाभावाद्वा न चैतद्बाधक
सद्भावोऽपि द्वेधा दृश्यादर्शनाद्वा तदभावनियतधर्मान्तरदर्शनाद्वा न तावत् दृश्यादर्शनो समस्त
शाखोपलंभाभावादिशुक्रो न च किञ्चिच्छ्रुतिदर्शनं तदभावनियतं येन तद्दर्शनात्तदभावा
वधार्यते। ताद्विरुद्धानामपि ग्रहणाग्रहणादिश्रुतीनां सहस्रशोदर्शनात्। तेन न तावद्बाधकसद्भा
वः। नापि साधकाभावः स खल्वात्मीयः सर्वेषां वा भवेत् न तावत्स्वप्रमाणनिवृत्त्या वस्त्वभाव
निश्चयोऽतिप्रसंगात् न च सर्वपुरुषाणामत्र प्रमाणं नास्तीति वाक्यमेन निश्चेतुं संभवति हि
तस्य शाखान्तरे समाम्नानं पुरुषान्तरेण प्रत्यक्षीकरणं। नित्यानुमेयत्वे हि सर्वेषामिहानुमा
नमेव प्रमाणं स्यात् तच्च प्रत्यक्षश्रुतिविरोधेनोदेतीति सर्वपुरुषाणां साधकप्रमाणाभावादी
पक्षरमभावावधारणं स्यात्। न च तद्दस्तीत्युक्तं अंधपरंपरादोषात्। अतः पुरुषान्तराणामिह
प्रत्यक्षसंभवात्तस्य चात्मप्रत्यक्षतुल्यत्वात्तस्माच्छ्रुति निराकरणं तदुक्तं आलीयास्खी

परप्रत्ययेऽनादरोपि नास्त्येतं किंच स्वीयानेवे स्यात्। अनादरेतितस्य वा किं मूलं तत्राह परेति। पिंडपितृयज्ञः स्वकाले सादनं गं स्यादि तिपिंडपितृयज्ञस्य दर्शानंगत्वसाधक चातुर्थिकाधिकरण पूर्वपक्षयुक्त्याभी समूलकमंगत्वस्यादिकृत्येस सूत्रवचनेयथा सर्वः। पिंडपितृयज्ञो दर्शकर्मणोऽंगं। अमावास्यायामपरा ह्ने पिंडपितृयज्ञेन चरंती तिरर्शकर्मनारकामावास्याशब्द समभिव्याहारादि त्यर्थः।

यस्य दौर्बल्यं न हि किंच नाप्रत्यक्षत्वाविशेषेण स्वप्रत्ययस्य समं हि तत्।यदा वैवं स्वशाखा पठितश्रुतितुल्यप्रमाणकतयास्मार्त्तमपि वेदवाक्यं संभाव्यते तदा स्मृतिलिंगमनुमानं न केनचित्प्रतिबध्यत इति न निर्मूलत्वं स्मृतेः शाक्यतेवकुमेनत्स्त्र वेद न स्पर्शन योरात्मीयपरकीयप्रत्यक्षश्रुतिविहितयोस्तुल्यकक्ष प्रमाणतया विकल्पो न्याय्यः। यदि परमात्मीयस्य प्रत्ययस्य विश्रंमणीयता तदा तेनैव परप्रत्ययमनादृत्य व्यवहारः क्रियते क्रियतां नाम। अनादरणं च सहस्रतमेप्यंशे परप्रत्ययस्याहर्ष मूलस्य न्यायाभास निमित्तत्वसंभवात् भ्रान्त्यादिमूलत्वसंभवाद्वाऽत्र्यंगं वा समभिव्याहारादि तिवत्तं न त्वप्रामाण्याध्यवसानं व्यवहार विशेषोचित्यप्रतिपादनार्थं चेदं सूत्रं विरोधे त्वनपेक्षं स्यादिति। श्रुतिस्मृत्योर्विरोधे यत्प्रमाणांतरानपेक्षं श्रुतिवाक्यं तदेव ग्राह्यं असति ह्यामूलत्वे परप्रत्ययानुमानं न्लोशाप्रयणमिति पथ्यांकुः। राम १५

यावदेकं श्रुतौ कर्मस्य तौ चान्यत् प्रतीयते तावत्तयोर्विरुद्धत्वे श्रौतानुष्ठानमिष्यत इति 15

संयुक्त्वेऽसत्त्रं निमपेक्षा गि निदं तत [illegible] दस्यागमी [illegible] णोमीये संभवात् रागमयू

वचचतुर्थाधिकरणमिति वक्ष्यमाणतालीयाधिकरण सिद्धांतव्याव र्त्य पूर्वपक्षयुक्त्याभा समूल मिसर्थ।

नन्वेवमप्यप्रामाण्यमापन्नेतत्राह। तेनेति। तावताप्यननुष्ठापकत्वलक्षणमेवाप्रामाण्यमापत्
र्थकत्वलक्षणमिति न दोष इति भावः। इदानीं बाधितार्थकत्वरूपाप्रामाण्यपरत्वेन वर्णकांतर
शाक्यादीति। आदिशब्देन वार्त्तिको क्त पाशुपत पांचरात्रादिसंग्रहः। कर्त्र इति। वैदिककर्तृक
८१ तेनफलेनाप्रामाण्यश्रुतिविरुद्धानां स्मृतीनामिति स्थितं माप्यमननुष्ठानरूपाप्रामाण्यपरं व्याख्ये
यं। यद्यप्यान्येतानि वाक्यांतराणि त्रयीविद्भिर्न परिगृहीतानि शाक्यादिनिर्मितानि धर्मशास्त्र
भासानि तेषामनेनाप्रामाण्यं एवं सूत्रोक्त कर्तृसामान्यप्रत्युदाहरणत्वेनोच्यते। तेषां हि प्र
त्यक्षादिमूलत्वेन प्रामाण्यं प्रत्यक्षसूत्रे निराकृतं। मन्वादिवत् वेदमूलत्वेन प्रामाण्यमिह
निराक्रियते। तेषां त्वसत्यपि प्रसिद्धवैदिकैरग्निहोत्रादिभिः कर्तृसामान्ये भिन्नप्रस्थानो वे
दामूलं भविष्यंतीति पृथैवाप्येवं तस्य त्रय्याभिन्नरूपतातथा चतुर्थ्योपि वेदेभ्यो भिन्नरूपा वे
दाः संभवेयुः। तथेदानीं प्रलीनानां मन्वादीनामपि हि केचित्प्रलीनशाखामूलतां मन्यंते
दे वा त्रापि भविष्यतीत्यस्यं च संभवति प्रामाण्येनाप्रामाण्यं युक्तमिति भवति केषांचिदाशं
कां साचमंदविषन्यायेन निराकर्तव्येत्येवमर्थमिदमधिकरणां कृतः पूर्वपक्षः। सिद्धांतस्तु
अविच्छिन्नवैदिकपरिग्रहानुपपत्त्या मन्वादिष्वनुपलभ्यमानोपि वेदः कल्पितः शाक्या

तिनन्तु बाधिता
रमाह यद्यपीति
त्वरूपस्यामा

त

दिष्टिदमत्यन्तविपरीतमवैदिकमप्रमाणं च तदित्येव शिष्टानां स्मरणं । वेदद्वेषिणश्च तेषां
प्रामाण्यमनुमन्यन्ते । दृष्टानुसारिणी च अदृष्टकल्पना न तद्दृष्टपरित्यागेन । अतो न वेदकल्पना
16 दवीयसीद्द्य प्रामाण्यमेव तेषां मे सन्मूलत्वादिति ॥ ॥ शिष्टाकोपे विरुद्धमिति चेत् । न शा
स्मृते ४ स्त्रपरिमाणत्वात् । आचान्तेन कर्त्तव्यं यज्ञोपवीतिना कर्त्तव्यं दक्षिणाचारेण कर्त्तव्यमित्येवमादी
नि क्वचित् अर्थाङ्गस्मरणान्युदाहरणं । किं प्रमाणमप्रमाणं वेति विचारः । तदर्थं च प्रत्यक्षेऽक्षस
विरुध्यते न वेति । तदर्थमप्यासि: क्रतुमध्ये तुष्णीयमानैः कस्यचिद्धुत्यर्थस्य क्रमादर्शं वति वाध्यो
न वेति । अथवाप्युपेत्येव विरोधं प्रमाणमप्रमाणं वेति विचारः तदर्थं प्रमाणप्रमेयवलावल
विसंवादे किं ज्यायः इति चिंत्यते तथाहि श्रुतिस्मृत्योः प्रमाणयोः श्रुतिर्बलीयसीति स्थितं ।
अतः श्रौतत्वाक्रमाद यः स्मार्त्तेभ्यः आचमनादिभ्यो वलीयांसो विज्ञायन्ते । प्रमेयस्वरू राम
पालोचने तु पदार्थगुणत्वात्क्रमादेशाचमनादयः पदार्था बलीयांसोऽवगम्यन्त इति वल १८

ऋत्वर्थपाठादिगम्यः क्रमः। प्राग्भावः शेषत्वं। अवगत इति अविप्रकर्षस्यापि विशेषणं।

वलाद्वयविसंवादात्कतरेण निर्णय इति संदेहः। तत्र पूर्वः पक्षः। ऋत्वुकानां क्रमादीनां स्मार्त्तै
राचमनादिभिः व्याकोपः स्यादतस्तावद्धिस्पर्शे व विरोधितात्ततः श्रुतिवलीयस्त्वात् स्मृतेः स्या
दप्रमाणता। पूर्वभाविप्रमाणस्थं प्रमेयस्याद्वलावलत्वन्यायस्तेनेव निर्णीत्ते न पश्चादि
तराद्रः नैराकांक्ष्या प्रमाणानामतः स्मृत्यर्थे वाधनं वेदं कश्चावेदि नुर्यादिति क्रमः ६। काल
श्चापः प्रधानेनांगानामविप्रकर्षः प्रयोगप्राग्भावश्च प्रयोगवचनावगतोऽपश्च पूर्वोक्ता पूर्वोक्तो वैद
दिः। परिमाणं चाविस्मृतसमस्तपदार्थानुष्ठानसिद्ध्यर्थं प्रयोगविधिनेवाकांक्षितं पदार्थवि नानां ५
धिप्रच्यवादवगतं तदेतत्त्रयमपि क्रमकालपरिमाणात्मकमाचमनादिभिरन्यथात्वं प्रतिपद्य
ते तेन विरोधस्तावदस्य वर्विरोधे च श्रुतिवलीयस्त्वात् स्मृत्यर्थस्यात्यर्थस्याचमनादेर्वाधः। न
च श्रुत्यर्थत्वेपि पदार्थगुणत्वात् क्रमादेर्दौर्वल्यं आचमनादेस्तु स्मृत्यर्थस्यापि पदार्थत्वा
द्वलीयस्त्वमिति वाच्यं। प्रमाणपूर्वको हि प्रमेयावगमस्तेन पूर्वभाविप्रमाणस्थं वलावलत्वं प्र

वैमवगम्यते तेनाचमनादिभ्यः क्रमादीनां बलीयस्त्वेन निर्णीते निराकांक्षत्वान्न पश्चादवगतं प्रमे
यवत्वावलम्बनादर्तव्यं । तस्मादाचमनादिस्मृतीनाम प्रामाण्ये । सिद्धांतस्तु पदार्थप्राप्त्यपेक्षत्वा
त्क्रमादेरविरोधित्वाविरोधेपि तु दौर्बल्यं पदार्थेभ्यो गुणत्वतः । सर्वेषु हि पदार्थेषु प्राप्तेषु प्रयो
17 गवेलायां तद्विशेषणतया क्रमं आश्री[illegible]यत इति । तेन पदार्थप्राप्त्यपेक्षत्वात्क्रमस्याश्रयं तेजघन्य
प्रमाणकोपि पदार्थः पूर्वं प्राप्नोति पश्चात्क्रमः सर्वपदार्थप्रयोगांङ्गं तयावतरत्रापि न पदार्थैर्वि
रुध्यते । कालोप्येवमेव प्रयोगांगत्वाद्यावंतः पदार्था अवधारिताः तेषां सर्वेषामेव पूर्वाह्णादिका
ल संप्रधानस्सन्निकर्षः प्रयोगप्राशुभावश्च परिमाणं तु न कस्यचिच्छास्त्रस्यार्थः । प्रयोगविधिरपि
न तदाक्षिपति अन्यथाप्य विस्मरणसिद्धेः । अथापि शास्त्रार्थः तथापि प्रयोगोपयिकत्वात्प्रयोगस्य राम
च प्रयोऽपि पदार्थप्राप्त्यपेक्षितत्वादविशेधित्वं । यद्यपि क्रमादीनामाचमनादिभिर्विरोधः स्या १७
त् तथापि सर्वपदार्थगुणत्वात् दौर्बल्यं । आचमनादयस्तु पदार्थत्वाद्बलवंतः ॥ न च प्रमाणबला

७ यज्ञोपवीत्येव धीयीत यजेयेत्येनेन वाययत्न(?)
प्रसक्तेरिति

बलस्य पूर्वभावित्वं न हि प्रमाणयोः स्वरूपतो विशेषः। अपि तु प्रमेयविशेषनिमित्तः। प्रमेयगतं हि
विशेषमालोच्य प्रमाणविशेषबुद्धिर्भवति। तद्यदेव प्रमेययोर्विशेषोऽवगम्यते तदेव तयोर्बलाबल
मपीति। तत एव निर्णये कृते नैराकांक्ष्यात् प्रमाणबलाबलमनादृत्यमिति न स्मर्यते वधो यदि
स्वभावतः एवाप्रमाणं शाक्यवाक्यं तत् सर्वदैवाप्रमाणं। यत्तु बलवद्विरोधापेक्षमप्रमाणं तत्तद
भावापेक्षया प्रमाणमेवेत्यवगन्तव्यं। न चात्र बाधकमस्ति प्रमाणबलाबलस्याबाधकत्वात् तस्मा
दाचमनादेर्बलीयस्त्वात्तद्विरोधेनैव श्रुत्युक्तमादयो बाध्यंत इत्याचमनादिस्मृतीना
मबाधात् प्रामाण्यमिति॥ ॥न त्विदमेवमधिकरणं पूर्वपक्षस्यातिमंदत्वात्। यज्ञोपवीतादेरप्र
त्यक्षश्रुतिविहितत्वेनानुदाहरणत्वात्। तस्माद्यत्तु पूर्वं शाक्यादिशास्त्राणामेषां नाम प्रामाण्यमुक्तं
तत्रैव वचो घोत्तरत्वेनाद्यं सूत्रद्वयं व्याख्येयं। यद्यपि तेषु हिंसादि वचनं श्रुतिस्मृतिशिष्टं न कोप
यति तत्प्रमाणं भवतीति चेत् न। तत्रोत्तरं न शास्त्रपरिमाणत्वादिति। न खलु येन केनचित् प्रमितो धर्मः

अष्टकादिकं व्यावर्त्तयति। अनिबंधना इति। शाक्याद्याचारं व्यावर्त्तयति। सदिति। फाल्गुनकृष्णप्रतिपदि परस्परजलसे
कावसंतोत्सवः। कार्त्तिकशुक्लप्रतिपदि दीपदानादि राधिशाद्यार्थः। व्यतिक्रमः इत्यादेरहल्यागमनादिः। साहसं वसिष्ठा
देः पुत्रशोकादात्मवधपर्यंतः। परोक्षरूपेण। आचारश्चैव साधूनामित्यादिना सामान्यरूपेण न तु प्रत्येकरूपेणेत्यर्थः।

१८

फलं साधयति। स्वाध्यायोध्येतव्यो वेदोऽखिलो धर्ममूलं तद्विदां च स्मृतिशीले। धर्मज्ञसमयः प्रमाणं वे
दाश्च पुराणन्यायमीमांसाधर्मशास्त्रांगमिश्रिताः। वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश इत्ये
वमादिभिरेव धर्मप्रमितेर्नियमादन्यतः प्रमितस्य फलसाधनत्वाभावेन धर्मत्वाभावात्तेषामप्र
माण्यमिति यत्तु तत्तीयं सूत्रमपि वाकारणाग्रहणे प्रयुक्तानि प्रतीयेरन्नित्ते च दर्शनाद्विरोधस्येति त
त्सदाचारप्रामाण्यप्रतिपादनार्थमधिकरणांतरं व्याख्येयं। अनानिबंधनाः सदाचाराः वसंतोत्सवा
दयः उदाहरणं ते किं प्रमाणमप्रमाणं वेति संदेहः। तदर्थं च श्रुतिमूलत्वं स्मृत्यादिमूलत्वं वेति चिंत
नीयं। तत्रास्मत्यधिकरणे करणे कर्तृसामान्यादाचाराणामपि स्मृतिवत्प्रतिपादितमपि प्रामाण्यं निर्नि
बंधनतया व्यतिक्रमसाहससंकराच्चाक्षिप्य समाधीयते। यदि वसंतोत्सवादयो ष्टकादिवद्वेदमू
स्मृ२ ला भवेयुस्तर्हि तद्वदेव मन्वादिभिरपि निबध्येरन्। अनिबंधनात्तु नैषां मूलं केनचिद्दृष्टं। आचा राम ९८
रपरंपरामात्रमेव दृष्टं मन्वादिभिरपि सदाचारः प्रमाणमित्येवं पारोक्ष्ये रूपेणाभिधानात्प्रामाण्य
पै

अगृह्यमाणेतिकारणाग्रहणइतिसूत्रांशव्याख्या।श्रुतीत्यादितेषिस्याद्यंशव्याख्या।सूत्रे।प्रयुक्ता
न्याचरितानि।प्रतीयेरन्।अप्रमाणत्वेनगृह्येरन्।

मन्तुमीपतेइतिमन्यामहे।तत्रसेवांधपरंपरास्याद्धर्मव्यतिक्रमसाहसदर्शनाच्चानाचारमात्रा
प्यक्यंधर्माध्यवसानमितिपूर्वःपक्षः।सिद्धांतस्तु।धर्मबुद्ध्यावैदिकैरनुष्ठानमसत्तिवैदिकैर
ऽनुपपन्नं।व्यतिक्रमसाहसदर्शनंतुरागद्वेषादिनिबंधनत्वान्नधर्मबुद्धिनिबंधनं।
तु धर्मबुद्धिनिबंधनस्यआचरितस्य अगृह्यमाणकारणत्वात्श्रुतिस्मृतिविरोधाऽद
र्शनाच्चधर्मलिंगत्वाव्यभिचारः।मन्वादिभिस्तुलाघविकैर्वैदिनामस्वरूपेणनि
बद्धःसामान्यात्मनाशिष्टाचारःप्रमाणमित्येवमुक्तं।नेतावताकश्चिद्दोषः।तस्मात्स्मृति
वदाचाराणामपिधर्मेप्रामाण्यंसिद्धं।तेष्वदर्शनाद्विरोधस्यसमाविप्रतिपत्तिःस्या
त्॥ ॥आचारप्रसंगाद्व्यवहारार्थप्रयोगभूताचारविप्रतिपत्तौबलाबलंचिंत्यते।अत्रभाष्ये
आर्यम्लेच्छविशेषानुपादानाद्वाक्यशेषेणचसिद्धांतकथनाच्छिष्टाचारस्यचपूर्वंप्र
कृतत्वाद्यत्रशिष्टानामेवमिथ्याभिधानविप्रतिपत्तिःकेषांचिद्वाक्यशेषानुगुणकेषां

च्चिदननुगुणा॰ तत्र तुल्यबलतामाशंक्य॰ वाक्यशेषानुगुणा या बलीयस्त्वं प्रतिपाद्यते इ
ति लक्ष्यते॥ तत्रोदाहरणाभावाद्यवादिशब्दानां दीर्घशूकादिष्वेव सर्वशिष्टप्रयोगाद
19 न्यस्यापि शिष्टप्रयोगविप्रतिपत्तिविषयस्योदाहरणस्यादर्शनात्संदिग्धेषु वाक्य
शेषादित्यनेन गतप्रायत्वाद्वाक्यशेषाच्चेन्निर्णयः ततोऽसति वाक्यशेषेऽपि युक्तानमि
युक्तप्रसिद्ध्योस्तुल्यबलत्वप्रसंगादयुक्तमिति मत्वाचार्यैरन्यथाधिकरणं व्याख्यातं।
यत्रार्यम्लेच्छयोरभिधानविप्रतिपत्तिः यथा पीलुशब्दमार्या वृक्षविशेषे प्रयुंजते म्लेच्छा
स्तु हस्तिनि॰ तत्र चिंत्यते किं तुल्यबलत्वमुतार्यप्रसिद्धिर्बलीयसीति। तत्र लोकप्रसिद्धि
गम्यत्वाच्छब्दार्थस्योभयोरपि समा विप्रतिपत्तिः स्यात्। शास्त्रार्थे हि बलाबलं। यः शास्त्र राम
ययैव संबध्यते नान्येन॰ क्रिया चात्र प्रत्ययवाच्या फलभावनैव॰ न च तस्यामुद्भिदादीनां
करणत्वं संभवति॰ समानपदोपात्तधात्वर्थावरोधात्॰ इति भावार्थाधिकरणे वक्ष्यामः॥ न
च धात्वर्थेनोद्भिदादीनां संबंधः संभवति॰ तस्य धातुना प्रत्ययार्थं प्रतिकरणत्वेनोपादा
नात् क्रियारूपत्तया नवगमात्॥ क्रियारूपत्वे वा धात्वर्थस्य प्रत्ययार्थं प्रतिकरणत्वानुपप
त्तेः॥ न च सत्यपि प्रत्ययवाच्यायाः फलभावनायां धात्वर्थावरोधे धात्वाक्षिप्तया धात्वर्थभावनया

द्भिदादीनांसंबंधइतिवक्तव्यं·तस्याइहाश्मातस्यात्·अस्मात्तपाचतयाशाब्दांतरस्यान्वयायो
गात्·फलभावनात्यत्रअश्रातानर्धावर्थभावनान्नचाध्याहृत्यधात्वर्थभावनांतयासंबं
40 धः।उद्भिदादिभाव्यमानेनयागेनपशून्भावयेदिति।विनाप्यध्याहारेणवाक्यसमन्वयोपप
त्तेः।तदवश्यंयदत्रप्रत्ययार्थकरणंयागः·तत्रैवततीयांतैरुद्भिदादिपदैर्वर्त्तितव्यं·नान्य
गतिरस्ति।तत्रगुणविधित्वेऽर्थांतरवाचिनामुद्भिदादीनामर्थांतरेयागेवृत्तिर्मत्वर्थलक्ष
णयास्यात्उद्भिद्वतायागेनेति।नामधेयपक्षेतुअस्या।सोमेनयजेतेत्येवमादिषुतुसोमा
दिशब्दानामर्थांतरेअत्यंतनिरूढत्वाद्यागेचकथंचिदप्यप्रसिद्धेःअप्रसिद्धकल्पनातो
वरंप्रसिद्धार्थद्वारेणलक्षणाश्रयणमितिमत्वर्थलक्षणयागुणविधानमंगीकृतंसो
मवतायागेनस्समीहितंकुर्यादिति।उद्भिदादीनांत्ववयववद्वारेणकर्मण्यपि राम ७०
प्रसिद्धिरस्तीतिअस्यानामत्वमेवयुक्तं।प्रयोजनंचनाम्नांसर्वत्रव्यवहारएवानहो

तरेण नामधेयमग्निहोत्रमित्यादिष्वनेनाहं यक्ष्य इति लघुराख्यानो पायः स्यात्। क्वचिद्गुण
फलोपबंधेनार्थवत्ता। दर्शपूर्णमासावारभ्यमाणोन्वारंभणीयामिष्टिं निर्वपेदिति गुणोपबं
धः। दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति फलोपबंधः। क्वचिद्भेदकतयार्थवत्वं
यथा अथैष ज्योतिरित्यादिषु वक्ष्यते। यथा चात्रोद्भिदा यजेत पशुकाम इति। नामधेयमा
वे हि प्रकृतस्यैव ज्योतिष्टोमस्य फलविधिरयं स्यात्। नामधेयत्वे तु यागांतरविधा
नात्सिद्धमर्थवत्वं॥ ॥यस्मिन्गुणोपदेशः प्रधानतोभिसंबंधः॥ ॥इह लोके जाति
गुणवचनतया निरूढाः गुणफलोपबंधेषु वाक्येषु श्रुताः। कर्मण्यपि योगवशेन
संभवंतः उत्पत्तिवाक्ये फलवाक्ये गुणवाक्ये वा ततीयानिर्द्देशेन कर्मसम
भिव्याहृताः शब्दाः सर्वे उदाहरणं। यथा चित्रया यजेत पशुकामः। पंचदशान्या
ज्यानि। सप्तदशानि पृष्ठानि त्रिवृद्बहिष्पवमानमिति चित्राज्यपृष्ठबहिष्पवमान
त्रिवृद्बहिष्पहिष्पवमानमिसत्रिकिसद्दापिबहिर्विषः नादीनां त्रिगुणां नायुः संपादनीयः इति विचार्य ते उतब
हिष्पवमानशब्देन स्तोत्रमेव तत्रैव त्रिवृद्विधीयत इति

शब्दास्ते गुणविधयः कर्मनामधेयानि वेति संशयः। तदर्थं च किं गुणविधौ वाक्यभेदोऽस्ति न
वेति चिन्तयितव्यं। कस्मात् पुनरुत्पत्तिवाक्यमेवाज्यैः स्तुवत इत्यादिकं नोदाहृयते। पक्षद्वये
पि निर्णयकारणाभावात् गुणवाक्याधीन एव निर्णय इति तदेवोदाहृतं। तथाहि - न ताव
41 दाज्यैः स्तुवत इति गुणविधिरध्यवसातुं शक्यते - घृतस्य स्तोत्रकारकत्वासंभवात् - तेन
लक्षणया घृतसंबंधिभिर्मंत्रैरिति वक्तव्यं - न च घृतसंबंधिनः केचिन्मंत्राः प्रसिद्धाः
ये लक्ष्येरन् - तत्रानेनैव वाक्येन लक्षणया घृतसंबंधं मंत्राणां विधाय तैः स्तोत्रे विधी
यमाने स्यात् गौरवं - विधौ च लक्षणा स्यात् क्लिष्टा समाश्रिता स्यात् - तद्वरं यदाज्यमीयु
रित्यादिवाक्यशेषावगतयोगाश्रयणेन नामधेयत्वमंगीकृतमिति न गुणविधित्वाध्य
वसानं। रूढत्वाच्च नामधेयत्वमपि न स्वध्यवसानं। यदा तु पंचदशान्याज्यानीति संख्या राम ८५
विशिष्टान्याज्यान्यवांतरप्रकरणेन स्तोत्रगुणतया विधीयंते तदा तेनैव प्राप्तमाज्यसंबंधं ल

स्तुणायामंत्राणामनूपस्क्तिमात्रमुत्पत्तिवाक्ये विधीयते। अनुवादत्वाच्चलक्षणानदोषः।
स्तुतिमात्रविधानाच्चैलाघवं विधेर्विनैवनामत्वेनलभ्यतइतिप्रासिद्ध्यादिभिर्गुणवचन
तैवाध्यवसीयते। यदातुनात्रसंख्याविशिष्टाज्यविधानंसंभवतिकिंत्वाज्यानुवादेनसं
ख्यामात्रविधानंतदास्तोत्रेषु तस्याप्राप्तत्वात्तदनुवादासंभवात्स्तोत्रानुवादेनैवसंख्या
विधातव्या। तत्राज्यशब्दस्यस्तोत्रवाचित्वेऽवकल्पतेनान्यथेतिगुणवाक्यालोचनेनैवाज्या
दिपदमुत्पत्तिगतंनामत्वेनाध्यवसीयतइतिपक्षद्वयेपिगुणवाक्याधीनत्वान्निर्णयस्यतत्रै
वकथाप्रवर्ततेपंचदशान्याज्यानीतिकिंसंख्यायुक्तंघृतंस्तोत्रांगतयाविधीयतेकिंवाऽज्य
शब्देनस्तोत्रमुद्दिश्यसंख्यामात्रंविधीयतइति। एवंसप्तदशानिपृष्ठानीत्यादिषुद्रष्टव्यं।
एवंचित्रयेत्यग्नीषोमीयपशुयागानुवादेनचित्राशब्देनचित्रत्वस्त्रीत्वेविधीयेते। उतदधि
मधुघृतंपयोधानाउदकंतण्डुलाः तत्संसृष्टंप्राजापत्यमितिप्रकृतोयागः फलेविधीयते

चि

त्राशङ्क्य चित्रद्रव्यकत्वात्तस्यैव नामधेयं तत्प्रसिद्ध्यादिभिर्गुणविधिः·रूढत्वाच्चैनोद्भिद

दिन्यायः·उत्पत्तिवाक्यावगतकर्मणत्वेनार्थात्सिद्धयागस्य यज्ञसाध्यत्वं तदनुवादेन वैयधिक

रण्येन गुणविधानान्न मत्वर्थलक्षणेत्यर्थः न च वाक्यभेदः·एकपदोपात्तत्वाच्चित्रत्वस्त्री

त्वयोरुभयविशिष्टैककारकविधानात् पशुकामपदमपि पशुसाधनकत्वादग्नीषोमीययाग

स्यार्जनांगतया प्राप्तसाधनकामनानुवादः·अस्ति हि पशुयागं कुर्वतः पशोः कामना·पंचद

शान्याज्यानीत्यपि संख्याविशिष्टाज्यविधानादवाक्यभेदः। तस्माद्गुणविधिः। एवं चाज्यै

स्स्तुवत इत्याद्युत्पत्तिवाक्येप्याज्यादिपदं गुणवाक्यप्राप्तगुणानुवादकं न नामधेयमिति

प्राप्ते विधीयते॥ वाक्यभेदप्रसंगेन सामानाधिकरण्यतः। अन्वारभ्यानार्थवादाच्च ना

मैतैवोपपद्यते॥१॥ चित्रत्वं स्त्रीत्वं चनैकेन विधातुं शक्यं· वाक्यभेदप्रसंगात्·उभयवि

शिष्टकारकविधानेपि गौरवं·कामपदं च फलमुखं साधने गौणं·प्रकृतफलाकं

राम ८२

स्द्दध्यादियागातिक्रमप्रसङ्गनन्याय्यः॰ तस्मात्तेषामेव फलमात्रविधानं चित्रापदं च सामा
न्याधिकरण्येन नामधेयं। पंचदशान्याज्यानीत्यत्रापि समासाभावान्नैसंख्यामात्रं विधे
यं॰ तच्च यद्युत्पत्तावाः संख्याविशिष्टद्रव्यप्रतिपत्तिरस्ति॰ तदोभयोर्द्रव्यसंख्ययोर्विधानाद्वाक्यभेदः॰ तस्मादाज्यानुवा
ज्यपदं नामधेयं ततो द्वाद तेनान्यथेति॰ गुणवाक्यवशादेवोत्पत्तौ नामत्वं विज्ञायते॰ सामाना
धिकरण्याच्च आज्यैः स्तुवत इति॰ वाक्यशेषाच्च यदाजिमीयुरित्यादेर्नामत्वमेव युक्तं। यत्तु॰ वार्ति
के पृष्ठैः स्तुवत इत्युत्पत्तिवाक्यमुदाहृतं॰ तत्र चोदयंति॰ यद्येतदुत्पत्तिवाक्यं तथा सत्युत्पत्तौ
बहुत्वयोगाद्रथन्तरादीनि मुख्यानि पृष्ठानि भवेयुः॰ तत्र यस्सप्तमे वक्ष्यते ज्योतिष्टोमे पृष्ठब
हुत्वाभावात् वैकल्पिके द्वे एव पृष्ठे न बहूनीति भेदाविरुणसामादिषु पृष्ठशब्दो गौणः॰
तेन विश्वजिति सर्वपृष्ठशब्दो बहुत्वापेक्षवान्नचोदकप्राप्तानुवाद इति तद्विरुध्यते॰ तेन
न [illegible] रथन्तरं पृष्ठं भवतीति बृहत्पृष्ठं भवतीत्युत्पत्तिवाक्यं वक्तव्यं॰ तथा च स्वयमेव

वार्त्तिककारेणैवमेव वक्ष्यतीति। सत्यमेवं· अनादरात्विदमुक्तं· एतदुक्तं भवति· सर्वथासम
63 दशानि पदस्थानीयेतदत्रोदाहरणं· यदेवतूत्पत्तिवाक्यपठितैः स्तकैवतैरिति वारथंतरं पृष्ठं
भवतीति वा न तदेवोदाहर्त्तव्यमित्यभिप्रायः॥ ॥तत्प्रख्यं चान्यशास्त्रं॥ ॥अग्निहोत्रं जु
आघारमाघारयति होति। आघारशब्दोग्निहोत्रशब्दश्च गुणविधिः कर्मनामधेयं वेति विचारः। प्रसिध्यादिभिर्गु
णविधिः। न च मत्वर्थलक्षणा अग्निहोत्रशब्दे बहुव्रीहिणैवाग्नये होत्रमस्मिन्निति मत्वर्थस्यो
५४ क्तत्वादुपसर्जनार्थोग्निर्द्देवता विधीयते। नामधेयत्वे च अरूपत्वं स्यात्। यद्यपि दध्यादिवाक्ये
द्रव्यं लभ्यते तथापि देवताभावादरूपत्वं। यदग्नये च प्रजापतये च सायं जुहोति यत्सूर्या
य च प्रजापतये च प्रातरित्यनयोरन्यतरेण गुणोपादानेन विशिष्टकर्मविधिवाद्देवतावि
धौ वाक्यभेदादसामर्थ्यान्नचैककारकविधानोवाक्यभेदः· विनियोगिप यत्केनका राम
रकेनानात्वात्। यदि स्यत्त्रीषोमवदग्निप्रजापतिभ्यां समस्ताभ्यामेको विनियोगिरश्यो ७२

यततत्तदुभयविशिष्टैकदेवताकारकविधानात्तन्नवाक्यभेदस्यात् । अथापिचाग्नीणातिव
त्यपकपदं विभक्तिः स्यात्तथापि तया वाक्येनाग्नेयैकहायनीवदग्निप्रजापत्योर्युग
पत्संबंधात्तस्मादुभयविशिष्टमेकंकारकं । यदातुप्रजापतिर्देवतान्तरं होतृभ्य इव चाव
नाविभक्तिः प्रत्येकमग्निप्रजापतिभ्यामुच्चरंती देवताविभक्तिः पृथक्संबंधभेदभिन्ना
मेव देवताभावनाभिव प्रतिपादयति तदा कुतो देवतैक्यं । देवतासामान्येन तु एकं
भावनासामान्येन तुल्यमिति समस्तो वेदएकवाक्यं स्यात्तत्रतो नाम देवे
ताविधानासंभवाद्रूपवत्त्वमिति गुणविधित्वमेव युक्तं । अविहितदेवताके चोपदे
विहोमेषु गुणविधानान्न तत्र स्वरूपत्वं । आघारशब्देनाविक्षरणसमर्पणद्रव्यमाज्य
पयःप्रभृत्यभिधीयते । तच्च द्वितीयानिर्देशादाघारणसंस्कार्यत्वेनावगम्यते । निःप्रयो
जनस्य च संस्कारासंभवात्प्रयोजनापेक्षायां प्रकृतद्रव्यापेक्षोपांशुयाजार्थता विज्ञाय

ते॰ प्रकरणेन च गुणो विधीयमाने नास्ति मत्वर्थलक्षणा॰ मतुप्प्रत्ययप्रयुक्तस्यैव वाक्यस्य
प्रकरणेन कल्पनात्॰ न चात्र यागो विधीयते॰ संस्कारमात्रश्रवणात्॰ न च संस्कारकर्म
44 णि कश्चिन्नाम भवतीति दृश्यते॰ तस्माद्गुणविधिः। एवं च द्वितीयानिर्देशो युक्तो भवति॰ आधा
रस्य संस्कार्यत्वाद् अग्निहोत्रे चाधीक्षिप्तसाध्यत्वानुवादेनोपसर्जनार्थविधानात्॰
नामधेयत्वे तु न स्यात् विधेयत्वात् कर्मैव विधेयं॰ न च स्वकरणमिति नामधेयं तृतीयांतं स्या
त्॰ अनुपपन्ना द्वितीया स्यात्॰ न च फलवाक्य एव कर्मणः करणत्वं उत्पत्तिवाक्ये तु
फलवाक्यापेक्षितकर्मस्वरूपकर्तव्यतैव प्रतिपाद्यत इति वाच्यं॰ विधेः करणत्वावगम
त्कर्मत्वासंभवात्॰ साध्यत्वे च तस्य साध्यांतरानपेक्षत्वात्॰ न फलवाक्येनापि फले
विधातुं शक्यत इति कर्मांतरमेव फलवाक्ये स्यात्॰ तथा चाघाराग्निहोत्राधिकरणे राम ४८
वक्ष्यते॰ न ह्यकरणभूतो सौ साध्यानपेक्षत्वाद्वाक्यांतरेणापि फले विधातुं शक्यत इति॰

तस्माद्गुणत्वाभावपि कर्मणः करणत्वात् द्वितीयानुपपत्तिः अतो गुणविधिः॥ अत्रोच्यते
वाक्यार्थो न विधातव्यो धात्वर्थविधिसंभवे। पदांतरं न चानन्यगतिनामत्वसंभवात्
१ अक्रियाहि धात्वर्थविधानं वाक्येनोपपदार्थस्य. तत्र यद्युपपदमनन्यगतिः स्यात्
स्याद्वाक्यार्थविधानं. तत्तु शास्त्रांतरप्रख्यापितं गुणं निमित्तीकृत्य नामधेयत्वेन
संभवतीति न धात्वर्थविधानं बाधितव्यं. किं पुनः शास्त्रांतरं यदस्य गुणस्य प्रख्या
पकं. अग्नेस्तावदग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहोति सूर्यो ज्योतिर्ज्योतिः सू
र्यः स्वाहेति प्रातरिति वाचनिको मंत्रवर्णस्याप्तिः। यदग्नये च प्रजापतये चेत्येतत्तु मंत्र
वर्णस्योपात्ताग्निसूर्यानुवादेन प्रजापतिसमुच्चयविधानं. अतो न वाक्यभेदः। अथवा
र वाक्येऽपि अग्निहोत्रसंज्ञके कर्ममात्रे विहिते चतुर्गृहीतं वा एतदभूत्तस्याघारमाघायस्य

ते नैवाज्यप्राप्तेः स्मरणात्मकसंप्राप्तमिति तन्निमित्तनामत्वसंभवात्कर्मविधानमेवयुक्तं।
ह्यं च संस्काराणामपि नामधेयत्वं उपांशुगतत्वात्यं तर्पीमं ग[illegible]तीति। न चास्य संस्कार
त्वं। इडऊहवे अध्वरइत्याद्यारमाबारपत्नीतिमांत्रवलिंके द्रदेवतात्वक्षायागात्वसिद्धेः। अतो
४५ नामधेयत्वं। अर्थोक्तिमत्साधपांशाभिप्रायश्च द्वितीयनिर्देशः। कथं पुनरशावेनानध्या
हृत्तेनवशाब्दस्यान्वयः। नहि श्रुत्यालक्षणयावाविधिवाक्ये सोत्वशाब्देनाप्यध्याहृतो [illegible] ध्याय
क्यभेदप्रसंगात्। अग्निहोत्रे होमं कुर्यात्तेहोमेन च फलमिति। अर्थोक्तिसेन यद्यन्वयः स्या
त्तेषामसति गुणोपपुक्तिदादिरर्थोक्तिमत्साधांशाभिप्रायेण करणभूतेपिकर्मणि विधी
यमानः स्वत्वेवशक्योविधातुमिति मत्वर्थलक्षणादत्तजलांजलिः स्यात्। एतेन येधा राम
त्वर्थस्यविषयतयाकरणत्वेनचान्वयं मन्यंते ते निरस्ता वेदितव्याः। विषयभूतेन हि ८५
कथं करणवाचिनां नामधेयानां सामानाधिकरण्यं। आर्थिकेन करणत्वेन सामाना

धिकरणमितिचेत्। साधकत्वमपि तद्यौगिकमस्तीति गुणविधिरपि विनैव मत्वर्थल
क्षणया विना च वैरूप्यं न स्यादिति समस्तमेव नामधेयप्रतिपादनमनुपपन्नं स्यात्।
अथ विषयव्यवहारे करणत्वपर एव शब्दः ततोऽन्यपरे शब्दे नोपायमात्रत्वेनोपा
विषयत्वं न शास्त्रार्थः स्यात्। अतत्परत्वात्। अथ शब्द एव प्रथमं विषयतयाऽभिधाय पुनः
करणतयाऽप्यभिधत्ते। कथं सकृदुच्चरितो द्विरभिदध्यात्। अभिदधानो वा साध्यत्वमपि पुन
रभिदधीत। न हि नियामकमस्ति द्विरेवाभिधत्ते न त्रिरिति। सकृत्प्रवृत्तायाः किमेव गुणेने
नेति न्यायात्। अतश्च गुणविधिरपि स्यादित्युक्तं। अतः करणत्वेनैवान्वयो वाक्ये न विष
यत्वेनेत्यास्तां तावत्। अतः कथं द्वितीयार्थ इति निर्देश इति चेन्नैव। तदुच्यते। अस्ति तावद्
दार्पिकं धात्वर्थस्य साध्यत्वं असाधितस्य करणत्वानुपपत्तेः। अतः साध्यसाधनयोर्द्वयो
रेकार्थसमवायात् साध्यताभिधायिनी द्वितीया साधनत्वमेव लक्षयन्ती धातुसामानाधि

५६

करणं प्रतिपद्यत इत्यविरोधः ॥ ॥ तद्व्यपदेशं च ॥ ॥ इह रूढिशब्दा एव वाक्यभेदरहितास्तद्व्यप
देशवन्त उदाहरणं । यथा श्येनेनाभिचरन्यजेतेत्यादिषु श्येनादिशब्दास्तेषु गुणविधिः कर्मना
मधेयं वेति संशयः । अयं तन्निरूढत्वाद्गुणविधिर्ज्योतिष्टोमादिषु काम्यत्वाच्च नित्यमुत्पत्तिशिष्ट
मपि सोमं बाधते । यद्वा गुणविशिष्टकर्मविधानं अप्रसिद्धार्थकल्पना तावरे मत्वर्थलक्ष
णा सोमादिवत् । न च यथा वै श्येन इत्यादि वाक्यशेषदर्शितक्रियासामान्येन कर्मणि गौणत्वेन
कर्मवचनत्वं युक्तं । असंनिकृष्टत्वाद्गौणत्वस्य । लक्ष्यमाणगुणयोगात्तु वृत्तिर्गौणीति वक्ष्यति ।
तद्वरं लक्षणैव आश्रिता । गौणत्वे चास्यं तार्थान्तरत्वात् श्रुतिबाधः । लक्षणायां तु तद्वत्सपि वर्तमानः श्ये
नशब्दो लोहितोष्णीषादिवत् उपसर्जनार्थश्येनविधिपर एवाकरणीभूतेन तु यागेन कर राम ४६
णीभूतस्य एकवाक्यतानान्तरेण मत्वर्थलक्षणां लभ्यत इत्येकवाक्यत्वार्थं लक्षणाश्रयणं । तास
र्थं तु श्रुत्यर्थ एवेति न श्रुतिबाधः । उच्यते । गुणविधौ तावत् स एव स्तोतव्यः । तस्य चात्मनैव उपमा

नमनुपपन्नमिति तद्व्यपदेशात्मकवाक्यशेषानुपपत्तिः। विशिष्टविधिस्तु गौरवादेवायुक्तः। न च सोमा
दिवत्सदांतरस्यानन्यगतिकत्वं यथावैश्येन इति वाक्यानुसारान्नैणत्वेन नामत्वसंभवात्। अत्रावश्यं
हि वाक्यशेषस्येदमेव प्रयोजनं। कथं नाम श्येनशब्दस्य यागनामता विज्ञायेतेति। तस्मान्नाम
धेयं। एवं च यौगिकवाक्यभेदप्रसंख्यातद्व्यपदेशेभ्यश्चतुर्भिर्नामत्वं साधितं। एतैरेव सर्वत्र नामधे
यत्वमिति द्रष्टव्यं॥ ॥नामधेये गुणश्रुतेः स्याद्विधानमिति चेत्॥ ॥वाजपेयेन स्वाराज्यकामो
यजेतेति वाजपेयशब्दः किं गुणविधिः उत कर्मनामधेयमिति चिंत्यते। तदर्थमिदं विचार्यते किं
यजेतेत्याख्यातं गुणफलाभ्यां तंत्रेण संबद्धुं समर्थं नेति। सर्वाणि चोद्भिदादीन्यत्रोदाहर्तव्या
त्र नि। सर्वेष्वाख्यातशब्देषु तत्संबंधसंभवात्। प्रसव्यर्थलक्षणादोषो नास्तीत्याक्षिप्यते धुना।
कर्मत्वं करणत्वं वा नाख्यातेनाभिधीयते यागादेः किंतु संबंधमात्रं साधारणं हि तत्तारायदि यजे
तेति यागस्य कर्मत्वमुच्यते ततः साध्यपदद्वयासमवायान्न फलं संबध्येत गुण एव साधनतया

संबध्येत। अथ तु करणत्वमेव यागस्य। ततोऽपि करणद्वयासमवायान्न गुणः संबध्येत। फलमेव संबध्ये-
तेति न स्यात्। तत्रैवं न वेतदन्यतरदपरिख्यातेनोच्यते। तद्वा चकशब्दाभावात्। प्रकृत्या हि यागमा-
त्रमुक्तं प्रत्ययेन तु भावना। तयोश्चोभयोः समभिव्याहारात् संबंधमात्रं गम्यते। तच्च कर्मत्वकरणत्वयोः
साधारणं। अतश्चोभयरूपसाधारणत्वाद्यागस्य तद्विषयापि भावना यागकर्मिका यागकर-
णिका चेति द्विरूपा संभवति। तत्र यागकर्मिकांशेन गुणसंबंधं तत्करणिकांशेन फलसंबंधं भा-
वना लभते। तत्रैवं सति विनैव मत्वर्थलक्षणया योगे गुणविधानमुपपन्नं। वाजपेयेन यागं कुर्या-
त्। यागेन च स्वाराज्यमिति॥ अत्रोच्यते॥ संबंधमात्रतात्पर्येनैकस्याप्यन्वयो भवेत्। न विशे-
षपरत्वे तु स्यादन्यतरसंगतिः॥१॥ रूपद्वयपरत्वं तु विना वृत्त्या न लभ्यते। तस्मान्नाख्यातशब्दस्य राम
तेन संबंधसंभवः॥२॥ प्रकृत्या लक्षणया वा यत्परः शब्दः स एव शब्दान्तरार्थेन संबध्यते। न च धात्वाख्या- ८१
तेन संबंधमात्रं धात्वर्थभावनयोरवगतं। ततो नैकस्यापि फलगुणयोः स्यादन्वयः स्यात्। फलस्य

लक्षणावा६

साधनापेक्षितत्वात्यागकरणिकैव हि भावनाफलसंबंधमर्हति। तथा गुणस्य साध्यापेक्षि
तत्वात् यागकर्मिकयैव भावनया संबंधः। अनिर्धारितोभयरूपात्तु नैकेनाप्यन्वीयते।
अयोग्यत्वात्। तत्रावश्यं विशेषपरताभ्युपगंतव्या। कथमनयोः कर्मकरणविभक्त्योस्तत्प
रताशब्दस्येति चेत्। सामान्यवाचिनी षष्ठी किमत्रास्ति येन संबंधमात्रमवगम्येत। असं
मभिव्याहारादेव लक्षणया संबंधावगतिरिति चेत्। तत एव समभिव्याहारात्पदांतरान्व
यपर्यालोचनया संबंधविशेषस्यैव सिद्धेः। न ह्यसति विशेषपरत्वे पदांतरान्वयो घटते इत्युक्तं। त
स्माद्विशेषपरता। तत्र कर्मपरत्वे गुणस्यैव संबंधो न फलस्य। करणपरत्वे तु फलस्यैव न गुण
स्येत्यन्यतरविशेषपरत्वेन्यतरस्यैव संबंधात् न तंत्रेणोभयसंबंधः। उभयपरत्वं तु नावृत्ति
मंतरेण लभ्यते। न खलु यस्मिन्नेव क्षणे यागं करणा यागं करणात्मनावबुध्यामहे तस्मि
न्नेव कर्मात्मनावबोद्धुमीशमहे इति स्वानुभवसिद्धमेतत्। एवं गुणप्रधानउद्देश्योपादानविध्य

नुवादकत्वेक्तमपि वैरूप्यं। अतो न तत्र त्वं भावनावदिति चेत्। यथा खलु भावना कर्मकरणत्वोद्दे
शोपादेयत्वादिरूपभेदमंतरेणैवाख्यातादिभिः धेयेनैवात्मनासाध्यादिभिः संबध्यते। इदमने
कर्मउ नेत्थं कुर्यादिति। तथा यागोपि करणत्वादिरूपमनादृत्य धात्वभिहितेनैव यागरूपेण फला गुण
भ्यां संबध्यत इति न वैरूप्यमिति। नाक्रियात्वात्। भावना हि क्रियारूपा सर्वकारकसा
धारणरूपैवेति युक्तं यद्वैरूप्येणानेकसंबंधं लभते। यागस्तु अक्रियारूपः कथमि
५६ वकारकरूपेण गुणादिभिः संबध्यते। तदसौ भावनाद्वारेणैवारु णैकहायनीवत् गुण
फलाभ्यां संबध्यत इति युक्तं। भावनासंबंधोपि चास्य न स्वरूपेणासंभवति कारकं क्रि क्रि
यया संबध्यते न वस्तुरूपं। अतोवश्यं कर्मात्मना करणात्मना वा धातुना यागः प्रतिपाद
नीयः। तत्रान्यतररूपप्रतिपादनेऽन्यतरेणैव गुणेन फलेन वा संबंधान्नोभयसंबंधसिद्धिः। राम
उभयरूपप्रतिपादने वा द्विरुच्चारणे वाक्यभेदः। तस्मान्न तंत्रसंबंधः। तेन गुणविधि ९९

त्याप्यभिहितेनैवरूपेण साध्यसाधनाभ्यां संबध्यत इति अधिकरणमिदमनुपपन्नं स्यात् x

पक्षे सेव मत्वर्थलक्षणा सोमेन यजेतारुणया क्रीणातीति वदाश्रयितव्येति वरं वाजपेयं
सुराद्रव्यमस्मिन्निति सुराग्रहविधानात्तत्प्रख्यतया नामधेयत्वं ॥ येन तु कार्याभिधायिनामे
व भावनाभिधेयानस्वाख्यातानामि स्याद्युः तेषां कार्ष्टेः पचतीत्यादिषु भावनाभावाद्धात्वर्थे
नैव कारकाणां संबंधात् क्रियारूपत्वं धात्वर्थस्याभ्युपगंतव्यं तत्तेष्ठ स्वरूपेण वधात्वर्थः का
रकसंबंधमर्हतीति विनैवावृत्तं न चोद्देशोपादानादिकृतमपि वैरूप्यं गुणविशिष्टयागवि
धानात् न च मत्वर्थलक्षणा कारकविभक्त्यैवकृत्या क्रियारूपधात्वर्थसंबंधसिद्धेः । अतोऽक्रि
यारूप एव धात्वर्थ इत्याश्रयणीयं । युक्तं चैतत् । अन्यथा हि कार्ष्टेः पचतीतिवत् कार्ष्टेः पा
क इत्यपि संबंधः स्यात् ॥ तेन यद्यपि धात्वर्थानामेवान्योत्पादनानुकूलतया क्रियारूपत्वम
स्ति तथापि न धातुभिस्तद्रूपमभिधीयते प्रतीत्यभावात् इति न तत्संबंधः कारकाणां ।
यथा हि वस्त्रादिशब्दाभिहितापि क्रिया न कारकैः संबध्यते तथा न धात्वभिहितापि । अ

वनादिशब्दा अपि न तद्रूपस्याभिधायकाः अदूरविप्रकर्षमात्रेण तेषामाख्यातपर्यायत्वं
आख्यातमेव तद्रूपाभिधायीति तेनैव कारकाणामन्वयः। तेन लडादिष्वपि कारकसं
बंधसिध्यर्थमाख्यातस्य भावनावाचित्वमंगीकर्त्तव्यं अन्यथा धात्वर्थस्य क्रियात्वापत्तेरधि
करणमिदमनुपपन्नं स्यात् भिवन्मते चाऽसत्यपि प्रत्ययार्थस्य क्रियात्वे धात्वर्थसंबंधित्वा
न्मुपगमात् कारकाणां सुतरां गुणविधित्वमेव स्यात्। अपि च लडादिभिरपि कर्मनाम
धेयानां करणार्थतया समभिव्याहारोऽनुवादवाक्येषु दृश्यते। वाजं वा एषोऽवरुन्धे यो
वाजपेयेन यजते य द्दर्भमयं परिधापयति वाजस्यावरुध्या इति। न यदि लडादिषु धात्वर्थ
एव क्रिया स्यात् कथं तृतीयान्तनामधेयसंबंधः न ह्यात्मैवात्मनः करणं भवतीति। तथा राम
यो राजसूयेन यजते योऽश्वमेधेन यजत इति। तथा यो राजसूयेन यजते योऽश्वमेधेन ४०
यजत इति। तथा तमाहरत्तेनायजत इतिल्लङः तत्प्रयोगेऽपि दर्शयितव्यं। अतो यथा वैदिक

यद्यपि विशिष्टविधौ न वाक्यभेदः तथापि विशेषणे घनेकत्वात् आक्षेपलभ्यविधिविशेषकत्वाभेदः। गौरवं किं यानागुणानां

वाक्यालोचनेन तु सर्वशब्दार्थं भवन्तोनुमन्यन्ते तथा सर्वाख्यातानां करोत्यर्थवचनत्वं विभक्त
लज्ञैरनुमन्तव्यं॰ तथाहि तत्रैव तन्तीयां तानां नामधेयानां करणसमर्पकतयान्वयो घट
ते॰ अन्यथा दुर्घटत्वं स्यादित्यासां तावत् तस्यास्सिद्धं नामत्वं॥ ॥तद्गुणास्तु विधीयेरन्नवि
भागाद्विधानार्थे न चेदन्येन शिष्टाः॥ ॥यदाग्नेयोष्टाकपालो मावास्यायां पौर्णमास्यां चा
च्युतो भवतीत्यत्राग्नेयशब्दो गुणविधिः कर्मनामधेयमिति विचारः॰ तदर्थं च किमत्र तत्प्र
ख्यन्यायोस्ति नेवेति। तत्रानेकगुणविधाने वाक्यभेदात् अष्टाकपालद्रव्यकं कर्ममात्रं वि
धीयते॰ तस्य तु स्थानक्रमादाग्निदेवत्यं याज्यानुवाक्यायुगलमंगं भवति॰ अतो मांत्रवर्णि
कोग्निरग्निर्होता च वस्तावस्त्विति तद्धदेवनामधेयत्वं उच्यते। मंत्राकांक्षा न चात्रास्ति सत्यामपि
न योग्यता। मंत्रस्य नास्ति वचनमग्निहोत्रेस्ति तत्रैव पाशान्नाष्टाकपालो भवतीत्येतावता
पुरुषव्यापारः कश्चित्कार्यो नुष्ठानाय स्मारकं मंत्रमपेक्षेत॰ सत्यामपि तु मंत्राकांक्षायां

आक्षेपाद्यापारलाभं मत्वाह १

पुरोडाशमात्रविषयस्यव्यापारस्यदेवतावाचिमंत्रसंबंधायोग्यत्वात्रसंबंधः यदियागस्वंमं
त्रसंबंधात्स्यागेवावगतंस्यात्ततोमेवद्देवताभिधायिनासंबंधः नत्वेतदस्ति देवतासंबं
क धात्प्रत्यक्षयागाश्रवणात्तानचात्रवाचनिकोमंत्रः येनाबारवत्बलात्मांत्रवर्णिकादे
वतास्यात् अग्निहोत्रेतुहोमस्यपुरुषव्यापारस्यश्रवणादस्तिमंत्राकांक्षा योग्यश्च
होमोदेवताभिधायिनामंत्रेणसंबद्धुं वाचनिकश्चतत्रमंत्रः तेनयुक्तं मात्रं वर्णिक
देवताकल्पनं इहतुमंत्रसंबंधस्याकांक्षायोग्यतावशेनकल्प्यत्वात्प्राक् यागात्
सिद्धिरस्तीति देवतासंबंधेनैवयागोलक्ष्यइत्याग्नेयशब्देनदेवताविधातव्या। विशिष्ट
कर्मविधानाद्यार्थादनेकेषामपिगुणानांविधिः सिध्यतीतिनवाक्यभेदः॥ बर्हिराज्ययो राम
रसंस्कारेशब्दलाभादतच्छब्दः॥ ॥कर्मनामप्रसंगात्द्रव्यनाम्नांबर्हिराज्यपुरो ५०
डाशशब्दानांसंस्कृतेषुशास्त्रस्थैः प्रयुज्यमानानांच्असंस्कृतेपिजातिमात्रेकेचिदशो
बर्हिरिहवांव्यासादयति ... नायुपांशुइत्सादोस्कृतानांइ तिशे...
बर्हिरादायगावोगताः आज्यंक्रय्यंपुरोडाशेनमेमाताप्रहेळकंददाति

स्त्रस्थैः प्रयुक्तानां किं संस्कारनिमित्तता यूपादिवत् उत जातिवाचितेति चिंत्यते॥ तत्रापील्वादि
वृद्ध्व वालादिवच्छास्त्रस्य याज्ञिकप्रसिद्धिः सोर्वविकी त्रशास्त्रस्य मूले छक्तिपयप्रसिद्ध
बलीयसीति संस्कारनिमित्तत्वेति प्राप्ते ब्रूमः। अन्वयव्यतिरेकाभ्यामेतेषां जातिवाचिता।
व्यभिचारान्न संस्कारनिमित्तत्वं प्रकल्प्यते॥१॥ न हि शास्त्रस्थाः सर्वलोकस्याप्यजातिमपहा
य प्रयुंजते· संस्कारं त्वपहाय जातिमात्रे केचित्प्रयुंजते· ते न जातिमेतेन व्यभिचरंति· व्यभिचरं
ति तु संस्कारं· अतो जातिवाचिता। न च शास्त्रस्थसकललोकविरोधः तेत्रापि जातेरन
पगमादित्युक्तं। न च जातिमात्रे शास्त्रस्थानामप्रयोगादतद्वचनत्वं· न हि यो यत्र शक्तः स
तत्र सर्वैः प्रयोक्तव्यः तस्माज्जातिवचनाः। प्रोक्षणीष्वर्थसंयोगात्॥ ॥प्रोक्षणीशब्दस्यापि
पूर्ववत्सर्वलोकशास्त्रस्य प्रयोगात् संस्कारनिमित्तत्वं प्राप्तमपोद्यते संस्कृतेपि केचित्प्रयो
गादव्यभिचाराज्जातिनिमित्तताप्राप्तान्न चावयवार्थता युक्ता· समुदायप्रसिद्धेर्बलीयस्त्वात्।

प्रोक्षणीरासादयेति २

प्रोक्षणीभिरुद्दिजितानास्मदातिजलकीडायां लोके २

51

अवयवद्वारेण हि विशिष्टार्थप्रतीतिर्वाक्यादिवद्वाक्यार्थप्रतीतिः पदार्थनिमित्ता लाक्षणिकी
समुदायप्रसिद्धौ तु अस्याप्रतीति रिति सैव बलीयसी। उच्यते रूढिर्लब्धात्मिका योगं बा
धते न त्वलब्धिका। तत्रैव चात्मलाभो ऽस्या यत्र नावयवार्थता॥१॥ यथा वक्ष्ये ऽश्वकर्णस्य सस्तु
वयवार्थेषु तत्तदवयवोपपन्नत्वाद्दर्थापत्तिः परिक्षीणा न ऽदृष्टां समुदायस्य शक्तिं कल्पयि
तुं क्षमा। सन्ति वयवार्थाः प्रकर्षोऽक्षणहेतुत्वात् स्त्रीलिंगत्वाच्च। तेनात्र नालानं लभते रू
ढिः। वाक्यार्थेषु वाक्यवत्। तस्माद्यौगिकः प्रोक्षणीशब्दः॥ तथा निर्मन्थ्ये॥ ॥निर्मन्थ्यश
ब्दस्यापि सर्वलोकप्रयोगात् संस्कारवाचित्वं अव्यभिचाराद्दाजाति निमित्तत्वं मुख्यत्वात्प्र
सिद्धावयवार्थत्वात् पूर्ववद्यौगिकत्वं साधनीयं। विशेषस्त्वेतावान् प्रोक्षणीशब्दो हि सेचन
साधनत्वनिमित्तः असिवाप्यां सेचनसाधनत्वं सर्वदेति युक्तं यौगिकत्वं। निर्मन्थ्यशब्दस्तु
मथनकर्मत्वनिमित्तः न च निष्पन्नस्याग्नेर्मथनकर्मत्वयोगपत्तास्ति। निष्पन्ने चाग्नावयं शब्दो

राम ५१

लोके प्रयुज्यते· निर्मथ्यमानयपक्ष्यामहइतिानच भूतपूर्वेणयोगेन प्रवृत्तिः· प्रतिक्षणम
ग्निभेदात्·अन्यो ह्यग्निर्मंथननिष्पन्नः· सतदैवनष्टः· अन्यश्चायं पाकायानीयते सोयमस
स्वयवाद्यैः प्रयुज्यमानः संस्कारमिव योगमपिव्यभिचरतीतिनतन्निमित्तः।जातिस्तुनव्य
भिचरतीतितद्वाचित्वमेवयुक्तमितिइमांविशेषाशंकांनिवर्त्तयितुमात्तेदेशः क्रियते।भूत
पूर्वमपियोगंनिमित्तीकृत्यसंतानाभिप्रायेणप्रयोगोपपत्तेर्नहि रूढिरसंतापरिहृत्यक
ल्पयितुंशक्यते।तस्माद्यौगिकः॥ वैश्वदेवेविकल्पइतिचेत्॥ ॥चातुर्मास्येषुप्रथमेपर्वणिपंच
यागाःसमाम्नाताः।आग्नेयमष्टाकपालंनिर्वपेत्सौम्यंचरुंसावित्रंद्वादशकपालंसारस्वतंचरुं
पौष्णंचरुंमारुतंसप्तकपालंवैश्वदेवीमामिक्षांद्यावापृथिव्यमेककपालमितितत्संनिधा
विदमाम्नायतेवैश्वदेवेनयजेतेति।तत्रसंशयः।किंयजेतेत्यनूदितानांयागानांवैश्वदे
वशब्देनगुणविधिर्विश्वेदेवादेवताविधीयंते किंवातेषामेवनामधेयमिति।तत्रनामत्व

पक्षेस्याद्वाक्यमेतदनर्थकं। देवताऽतो विधेयास्यात् गत्यभावाद्विकल्प्यते॥ न तावदत्र पक्षे हि तस्या
विधेयत्वात् या~~गस्या~~ गस्यारूपत्वेनाविधेयत्वात् समस्तवाक्यानर्थक्यप्रसंगः। तस्माद्गुणविधिः।
आग्नेयादिवद्रुद्रेष्वपि यागेषु देवतान्तरमनवकाशमितिचेत् न। विकल्पसंभवात्। न ह्य चाविस्
त्रे भाष्यकारास्यानुत्पत्तिशिष्टप्राबल्यं कथितमिति तुल्यबलतां मन्यते। ननु च गुणाधिकर
ता बलाबलं वक्ष्यते तेन गतार्थमिति चेत् न। आनर्थक्याधिकयात्। वक्ष्यते हि श्रुतिलिंगा
धिकरणे दुर्बलस्यापि प्रमाणस्य बाधे यदि किंचिदनर्थकं भवति तदा विपरीतोऽपि बाधो भव
तीति। तद्विहाप्यविधीयमाने गुणे समस्तस्यैव वाक्यस्यानर्थक्यप्रसंगात् देवतैव विधा
तव्या। सा च गत्यभावादुत्पन्नशिष्टाप्युत्पत्तिशिष्टैरग्न्यादिभिर्विकल्प्यते। स्यादेतदेवं
यदि वाक्यमनर्थकं स्यात्। तन्न। अनुवादत्वेऽपि समुदायीकरणेनार्थवत्त्वात्। न हि नानावाक्य
चोदितानामाग्नेयादीनामेकशब्दोपादानादृते समुदायभावापत्तिरेकसंज्ञासंबंधो

राम ५२

52

इतरथा ह्यामिक्षायागस्यैव वैश्वदेवसंप्रस[illegible]नात्।

वाल्लभ्यते ऽसति त्वनुवादे तेनैव वैके[illegible]न निमित्तेनैव प्रतीयारूढानां एकसमुदायत्वमेकना
मधेयत्वं च लभ्यते। ततश्च प्राचीनप्रवणे वैश्वदेवेन यजेतेत्येवमादिषु वैश्वदेवनामक
स्यैन्निज्ञानात् प्राचीनप्रवणादिसंबंधः स्यात्। ननु अनुवादोपि अर्थलाभादामिक्षा
यागस्यैव स्यात्। इतरथा हि वैश्वदेवा वैश्वदेवसमुदाये वैश्वदेवशब्दः छत्रिन्यायेन कल्प्यः
स्यात्। न। आनर्थक्यात्। आमिक्षायागस्य हि देशादिसंबंधोऽसत्यप्यनुवादे लभ्यते। त
तश्च तदवस्थ्यमानर्थक्यं स्यात्। वरं चानर्थक्याल्लक्षणाश्रयणं। न चावश्यं लक्षणा। वाक्य
शेषदर्शितयोगवशेन अष्टानामपि यागानां नामत्वसंभवात्। एवं हि श्रूयते यद्वि
श्वेदेवाः समयजंत तद्वैश्वदेवस्य वैश्वदेवत्वं तदनेन योगेनाष्टानां नामत्वमुत्पादनार्थ
मनुवादः। सति चानुवादत्वे नाप्यपूर्वत्वेन देवताविशिष्टयागांतरमपि शंकनीयं। गौर
वात्। प्रकृतप्रत्ययबाधाच्च। अष्टौ हवींषीति चाष्टत्वं तानन्यगतिलिंगविरोधात्। तस्मात् समु

यद्दशकपालो विराजेवास्मिन्नन्नाद्यं दधाति यदेकादशकपालस्त्रिष्टुभैवास्मिन्निन्द्रियं दधाति यद्द्वादशकपालो जगत्यै-
वास्मिन्पशून्दधाति यस्मिञ्जात एतामिष्टिं निर्वपति पूत एव तेजस्व्यन्नाद इन्द्रियावी पशुमान्भवती त्यंतं गतं सैः ४

दाद्यानुवादः। तत्र च दृष्टयोगेन वा एकदेशदेवतात्वेन वा विश्वेषां देवानां समवायात्तत्प्रख्यन्या-
येन नामधेयं वैश्वदेवशब्दः॥ ॥एवं वंतो विधानार्थास्तु सामर्थ्यं समाम्नाये॥ ॥वैश्वानरं द्वादश-
कपालं निर्वपेत्पुत्रे जात इत्युक्त्वा यदष्टाकपालो भवति गायत्र्यैवैनं ब्रह्मवर्चसेन पुनाति
यन्नवकपालस्त्रिवृतैवास्मिन्तेजो दधाति इत्येवमादि श्रूयते। तत्र विचारः। किमष्टाकपा-
लादिशब्दाः प्रकृते वैश्वानरयागस्य नामधेयं उत तत्रैव गुणविधिः अथवा फले गुणवि-
धिः किं वा अर्थवाद इति। तदर्थं च किं गुणविधिपक्षे सर्वेषामष्टाकपालादीनामुत्पत्तिशि-
ष्टता संभवति। किं वा सर्वेषामुत्पन्नशिष्टता। अथवा द्वादशकपाल उत्पत्तिशिष्टः अन्ये तू-
त्पन्नशिष्टा इति। तत्र वैश्वानरसामानाधिकरण्यादष्टत्वादीनां द्वादशसु प्राप्तेस्तत्प्रख्य-
न्यायेन नामधेयत्वमाशंक्य तद्व्यवचनत्वा यागसमानाधिकरणत्वाभावात्तत्प्रख्य-
त्वाभावाच्च गुणविधिः। तथा हि। यद्यपि द्वादशत्वं विद्यते तथापि न द्वादशकपाले राम ५३

५३

अष्टाकापा
लादिक्वचने

समस्तियोऽप्यष्टसु कपालेषु संस्कृतः पुरोडाशः सोऽष्टाकपालः १ नगरे

ष्टाकपालः॥ न च पुरोडाशे पुरोडाशांतरमस्ति। न च द्वादशकपाल एवाष्टसु संस्कृत
इति शक्यते वक्तुं। अश्रुतत्वात् सापेक्षत्वाच्च। अष्टभिश्चतुर्भिश्चासौ संस्कृतो न केवलैरष्ट
भिः। ततश्चासामर्थ्यात् तद्धितानुपपत्तिः। तस्मात् प्राप्त्यभावान्न तत्परत्वं। अत एव नार्थवा
दत्वं न च विहितस्याष्टाकपालस्य स्तुतिः संभवति। तस्माद्गुणविधिः। अष्टाकपालद्रव्यं
वा अष्टत्वसंख्या वा विधीयते वैश्वानरयागे। न चोत्पत्तिशिष्टद्वादशकपालावरोधाद्वि
धानं। सर्वेषामुत्पत्तिशिष्टत्वात्। एकं हीदं वाक्यं वैश्वानरं द्वादशकपालमित्यादि यस्मि
ञ्जाते इत्येवमंतं। एकोपक्रमावसानत्वात्। मध्ये चाष्टत्वादयः श्रुताः। सर्व एवोत्पत्तिशिष्टा
भवंति। यद्वा सर्व एवोत्पन्नशिष्टाः। वैश्वानरं द्वादशकपालमिति देवताविशिष्टयागविधा
नात्। तत्र तु यदष्टाकपाल इत्यादिभिर्वाक्यांतरैर्वैकल्पिकद्रव्यविधानं। उपक्रमे तु द्वा
दशकपालशब्दो गुणवाक्यप्राप्तद्रव्योपलक्षणार्थो न विवक्षितः। विवक्षितत्वेऽष्टाकपा

गुणत्वं वाक्यगतत्वादितरेभ्यो वाक्यान्तरविहितेभ्यो बलवत्त्वात्। न चाप्युत्पत्तिशिष्टत्वं सर्वेषा ४

लदीनामानर्थक्यं स्यात्। तस्माद्गुणविधिः॥ उच्यते। उत्पत्तिवाक्यशिष्टत्वं न तावदुपपद्यते। सर्वे
षामर्थभेदेन वाक्यं तत्र हि भिद्यते॥१॥ अर्थवादत्वे ह्येकवाक्यत्वं सिद्ध्यति। स्वपक्षे तु नाना गुण
विधाने नार्थभेदाद्वाक्यभेदः स्यात्। किं च निर्वपतिना चात्र कर्मविधानं। स च द्वितीयान्ते
न द्वादशकपालेनैव संबध्यते। न प्रथमान्तैरष्टाकपालादिभिः तत्र द्वादशत्वमनुपप
त्तिमत्। न द्वादशकपालस्य ह्यविवक्षोपपद्यते। वैश्वानरसमानाधिकरणं द्वितीयान्तं द्वा
दशकपालपदं निर्वपतिसंयुक्तं नाविवक्षितं विनाकारणेन कल्पयितव्यं। अष्टत्वादीना
मन्यथाप्युपपत्तेः। तस्मादुत्पत्तिशिष्टं द्वादशत्वं। इतरेषां कर्मान्तरविधानासंभवात् ब्रह्मव
र्चसादिफलार्थत्वेन वैश्वानरयागमात्रे साष्टत्वादिविधानं। काम्यो ह्युत्पत्तिशिष्टबा स्प
१ धेनापि शक्यते विधातुमिति प्राप्तेऽभिधीयते॥ फलार्थेषु गुणेषु स्याद्वाक्यभेदोऽर्थभे ५४
दतः। उत्कर्षोपसंहारसामर्थ्याद्वा त्वेकवाक्यता॥१॥ वैश्वानरं द्वादशकपालमिति येऽवेष्टि स्त

पक्रांतातामेवयस्मिन्जातएतामिष्टिंनिर्वपतीत्युपसंहृत्ययमाणामंतेपश्यंतोनतन्मध्येवाक्यां
तरमुपगंतुमीश्महे।फलेभ्यश्चगुणेषुविधीयमानेषुस्फुटएववाक्यभेदः।अर्थभेदात्।त
स्मादर्थवादत्वं।अवयवद्वारेणैवविस्कृतिः।द्वादशकपालावयवोहियोष्टसुसंस्कृतः।सोष्टा
कपालपुरोडाशसादृश्याद्गौण्यावृत्त्याष्टाकपालइत्युच्यतेस्तोतुं।तस्मादर्थवादः[illegible]त
स्सिद्धिः॥यजमानःप्रस्तरोयजमानएककपालइत्यत्रगुणविधिनामधेयार्थवादसंदे
हेसामानाधिकरण्यादेकस्मितरस्यनामधेयंप्रस्तरशब्दोवायजमानस्ययजमान
शब्दोवाप्रस्तरस्येतिशंका।भिन्नार्थत्वेनतुप्रसिद्धत्वान्नैकमपीतरस्यनामधेयं।नचार्थां
तरवचनेनार्थांतरस्यस्तुतिर्भवति।अष्टाकपालादिस्त्ववयवद्वारेणस्तुतिरुक्ता।द्वाद
शकपालस्यानचप्रस्तरावयववचनोयजमानशब्दःयेनस्तुतिःस्यात्।तस्मादन्यतरका
 र्येऽन्यतरविधानाद्गुणविधिः।तत्रापियजमानस्यमुख्यत्वात्स्तुतिवत्तोयजमानःप्रस्त

रशब्दलक्षिते स्रुग्धारणादौ कार्ये विधीयते। तस्मान्न गुणविधिः। नैतदेवं। यजमानस्य स्रुग्धा
रणे विनियुक्तस्य स्वपदार्थकरणविरोधात् प्रस्तरे वज्रसूक्तवाकेन प्रहरणादेककपाल
वज्रसर्वहुतकरणात् सर्वतन्त्रपरिलोपः स्यात्। तस्मादर्थवादः। कथं परशब्देन परस्य स्तवनं।
५५ सामानाधिकरण्येन वा गुणादिति ब्रूमः। कथमगुणवचनो गुणमभिदध्यात्। नाभिदधा
ति। किन्तु स्वार्थसंबन्धेन बोधयति। यजमानशब्दो हि स्वार्थमभिधत्ते। स चाभिहितः स्वस
मवेतं स्वकार्यकरत्वसंबन्धात् बोधयति। तच्च प्रस्तरेऽप्यस्तीति प्रस्तरबोधः। एवं स्वार्थसदृशे
तद्गुणशालिनि तात्पर्यं यजमानो यजमानशब्दो गौणः। यथा तेऽपि यथा लोके सिंहो देवदत्त सं ४
इति। न चाध्यारोपितार्थत्वं लोके गौणत्वं। तदभावात्। न हि सिंहो देवदत्त इति प्रयुञ्जानस्य राम
सिंहत्वाध्यारोपोऽस्ति। शौर्यादिगुणविवक्षयैव प्रयुङ्क्ते। प्रतिपत्तारोऽपि सादृश्यमेव प्रति ५५
पद्यन्ते नाध्यारोपं। तस्मादभिधेयसदृशवृत्तिर्गौणत्वं नाध्यारोपितवचनत्वं। कथं पुन

र्हि खपुष्पशशविषाणादिशब्दानां गौणत्वं · खपुष्पं भवसिद्धांत इत्यादिषु न हि तेषां मुख्यम
भिधेयमस्ति येन सादृश्याद्गौणत्वं स्यात् । उच्यते । यद्यपि तेषामभिधेयं नास्ति कथं तस्यान्य
त्र तद्रूपारोपः · न हि स्वरूपेणाविद्यमानमन्यत्रारोपयितुं शक्यते । तेन तद्रूपमेवारोपित
मंगीकर्तव्यं ततश्चारोपितस्यापि तस्य मुख्यत्वाद्युक्तमन्यत्र गौणत्वं । व्यत्यये तु खपुष्प एव
खपुष्पशब्दो गौणः स्यात् · आरोपितवचनत्वात् भवतीति चेत् न · सर्वलोकविरोधात् । तस्मा
दध्यारोपो गौणलक्षणो स्यार्थसादृश्यं तु भवतिलक्षणं · खपुष्पादीनामपि मुख्यसादृ
श्यविवक्षयैव लौकिका गौणं प्रयोगं प्रयुंजते यथाकाशस्य पुष्पात्मना · शशमूर्द्धवर्त्तिनां चा
वयवानां विषाणात्मना विकारोत्पत्तौ प्रसिद्धो निष्पन्नमाणकः · तथा भवसिद्धांत इति । तस्मा
द्यजमानवत् कार्यसिद्धाववयुहितत्वात् प्रस्तरस्य प्रशंसेयमित्यर्थवादत्वं ॥ जातिः ॥ ॥ अ
ग्निर्वै ब्राह्मण इत्यादिष्वपि पूर्ववदनुलविधिवं नामधेयत्वं चोदनाद्यार्थवादत्वं साधनीयं ॥ नि

मित्तांतरकथनार्थं तु सूत्रांतरं। एवमुत्तरसूत्राण्यपि द्रष्टव्यानि। सर्वत्र हि परशब्दस्य परत्ववतो
तस्मिन् द्विकरत्वं निमित्तं। इह तु जातिः जननमित्यर्थः। द्वावपि ह्यग्निब्राह्मणौ सृष्टिकाले ब्रह्मणो
मुखाज्जातावित्यर्थवादे संकीर्तितौ। अनेन निमित्तेनाग्निशब्दो ब्राह्मणे वर्तते स्तोतुं॥ सारूप्यात्
आदित्यो यूपो वा यजमानो यूप इत्यत्रापि त एव पक्षाः। सारूप्यं तत्र प्रवृत्तिनिमित्तं। ननु सर्वत्र
सारूप्यं गौणत्वनिमित्तं को त्र विशेषः। सत्यं। इह तु चक्षुर्ग्राह्यं सारूप्यं विवक्षितं। चाक्षुषं हि
यूपस्य यजमानेन सारूप्यं ऊर्ध्वत्वं। आदित्यस्य सारूप्यं अंजननिमित्तं तेजस्वित्वं। अतस्तद्द्वारेण
यजमानादित्यशब्दाभ्यां यूपस्तूयते॥ प्रशंसा॥ ॥ अपशवो वा अन्ये गो अश्वेभ्यः पशवो गो अ-
श्वाः इत्यत्र नामधेयत्वमनाशंक्य इति गुणविधित्वेन पूर्वः पक्षः। पशुकार्येण वाश्वव्यतिरिक्तानां राम
प्रतिषेधः क्रियते ऽजादीनां॥ सिद्धांतस्तु। तत्र तत्राजादीनां विहितत्वात् अशक्यः पशुकार्यप्रतिषेधः। ५६
तस्मादर्थवादः। प्रशंसानिमित्तस्तु परशब्दस्य पशुव्यतिरिक्तघटादिवचनस्य पशुशब्दस्य पर-

अजादिषुपशुशब्दप्रयोगः।ननु·सर्वएवप्रशंसानिमित्तोर्थवादः किमत्रविशेषेणोपन्यस्यतेस
त्यं।फलमन्यत्रगुणवादस्यप्रशंसा·तत्सिद्ध्यादिनागुणेनशब्दः प्रवृत्तः प्रशंसाफलोभवति·इ
हतुशब्दप्रवृत्तिनिमित्तमपिगुणः प्रशंसैवातथाहि।अयमत्रार्थः।अपशवोवाअन्येगोअश्वेभ्यइ
त्यत्रापशवइतिनञ्समासगतेनपशुशब्देनप्रथमंगवाश्वगतंप्राशस्त्यमुपादायपश्चात्तद
भावोनव्यापश्वंतरेषुकथ्यते।नहिपशुत्वंशक्यंप्रतिषेद्धुं।अवश्यंचपशुशब्दोपात्तोर्थोनव्याप
श्वंतरेषुपर्युदसितव्यः।शक्नोतिचपशुशब्दोयंगवाश्वशब्दाभ्यामेकवाक्यतयासंबद्धः त
द्गतंप्राशस्त्यंलक्षयितुं।तच्चनञापर्युदसिष्यते।एतदुक्तंभवति।गवाश्वेषुयत्प्राशस्त्यंनतदन्ये
ष्वस्ति·तस्मादप्रशस्ताअन्ये·गवाश्वमेवप्रशस्तमिति।सोयंगवाश्वगतप्राशस्त्याभावः पश्वंतरा
णामपशूनांचतुल्यइत्यनेनाभिप्रायेणपश्वंतराण्यपशवइत्युच्यंते।भूमा॥सृष्टीरुप
दधातीतिसृष्टिशब्दोगुणविधिः अर्थवादोवेतिसंशये·तत्राख्यातसंबंधात्विध्यंतरशेष

तो भावात् सूर्यवत्त्वाच्च विधिः। सष्टिलिंगा मंत्रा उपधानार्थेन विधीयंते। नैवं। लिंगप्रकरणाभ्यामे
व मंत्राणां प्राप्तत्वान्न विधिः संभवति। तथा सति परिसंख्या स्यात्। बहुषु मंत्रेषु प्रकरणप्राप्तेषु स
ष्टिविधानादन्ये परिसंख्यायेरन्। सा च त्रिदोषा परिसंख्या। तेनां च मंत्रांतराणामानर्थक्यं
स्यात्। तस्मादुपधानमेव विधेयं। सष्टीरिति तु लिंगप्राप्तमंत्रानुवादमात्रं। यथा स्वप्नमेवावरुं
धे। इत्यर्थवादस्योपपत्त्यर्थमिति भाष्याभिप्रायः। किंचित्वयं मंत्रविधिरेवेति समर्थ्यते। नष्टे
कयास्तवतीत्यादीनामुपधाने कांतिकं लिंगमस्ति। न पेन प्राप्तिः स्यात्। साधारणलिं
गत्वात् द्विग्रहणासादनादिष्वपीष्टकानां प्राप्नुयुः। तत्रास्ति विधेरवकाशः। सत्यामप्युपधा
ने प्राप्तौ मध्यमचितिसंबंधार्थमपि प्रत्यक्षविधानमर्थवद्भविष्यतीति वक्ष्यति हि। मध्यमा राम
यां तु वचनाद्व्यालक्षणवत्त्व इति। न चास्मिन्पक्षेऽवश्यं सष्टीनामपि विधानमादर्तव्यं। गुणत्वे ५७
ति निमित्तकथनमात्रपरत्वात्। कः पुनरत्र गुणः। भूमा। सप्तिसमुदायो हि सप्तिभूमा सौ।

स्मृ स्तुतिसमुदायेप्येकपाठस्तवनेत्यनुवाकेस्तुतिभूमास्तीत्यनेनसादृश्येनस्तुतिशब्दः॥ ॥
लिंगसमवायात्॥ ॥प्राणभृतउपदधातीत्यत्रापिपूर्ववदेवमंत्रोपादानंत्वर्थवादार्थंविधे
र्थंवेतिवक्तव्यं।निमित्तांतरकथनार्थंतुसूत्रांतरं।तत्रहिभूम्नाशब्दप्रवृत्तिः।इहलिंगवता
५४ त्यस्यासमवायमात्रादेवशब्दप्रवृत्तिः।प्राणभृत्स्वपिप्राणभृत्समवायोस्ति।प्राणभृदप्रा
णभृतोपिप्राणभृत्समवायोस्तीत्यनेनसादृश्येनप्राणभृच्छब्दः।तदेवांतस्थितिर्जाति
सारूप्यप्रशंसालिंगभूमभिः।षड्भिः सर्वत्रशब्दानांगौणीवृत्तिःप्रकल्पिता॥ संदिग्धेषु
वाक्यशेषात्॥ अक्ताःशर्करा उपदधाति तेजो वै घृतमित्यत्रसंशयः।किंघृततैलवसानां
मन्यतमेनकेनचिदंजनंकर्त्तव्यं उतघृतेनैवेति।तदर्थंचकिंविध्युद्देशार्थवादयोःविरो
धोस्तिनवेति।सावकाशेनप्रामाण्यमर्थवादस्योक्तं।इहसंदिग्धनिर्णयेपिक्वचित्प्रामा त
ण्यंप्रतिपाद्यतइतिसंगतिः।तत्राक्ताइतिशब्देनयेनकेनचिदंजनंप्रतीयतेविधिश्राय
॥

बलीयानर्थवादस्ततः ॥१॥ प्राधान्यात्प्रक्रमस्य वादप्राप्तविषयत्वतः । तत्र धात्वर्थशब्दोयं लक्षणां
धर्ममभिविष्यति ॥२॥ प्रधानं विधिः । अङ्गं स्तुतिः । न चाङ्गेन प्रधानं बाधितुं शक्यो ऽउपक्रमस्य बाध्या
संजातविरोधो विधिर्निर्विघ्नमेवस्वार्थं बोधयन्नुपसंहारस्थं विरुद्धमर्थवादं लक्षणां नय
ति । विधिश्चाप्राप्तविषयत्वाद्यथाश्रुत एव नेतव्यः । अर्थवादस्तु अनुवादत्वाल्लक्षणयापि नी
यमानो नातीव दुष्यति विधेश्च यत्किंचिदंजनसाधनं गम्यत इति तेन बाधितो घृतशब्दो
ऽर्थवादस्थांजनसमर्थद्रव्यमात्रलक्षणार्थोभविष्यति । तस्माद्येन केनचिदंजनमिति प्राप्ते ब्रू
मः । विधेर्यदि विरोधः स्यादर्थवादेन चास्य सो । न हि सामान्यशब्दोयं विशेषेण विरुध्य
३सू ते ॥१॥ सामान्यं हि विधिनाबाधितं तच्च सर्वविशेषेषु त्वमस्तीति न विशेषोपादानेन तस्य बा
धः । अवश्यं च यः कश्चिद्विशेष उपादातव्यः । निर्विशेषस्य सामान्येन व्यवहाराभावात् । तत्रा राम ५८
सति विशेषप्रमाणे यः कश्चित्स्यात् । अस्ति त्वत्र घृतस्य प्रमाणमर्थवादः । स हि घृतं स्तौत्येव

अविधेयस्य स्कन्दयोगात् विधेयत्वं गमयति। तस्माद्भूतेनैवांजनं॥ ॥ अर्थाद्वा कल्पनैक
देशत्वात्॥ विधेरिदानीं प्रतिपादितप्रामाण्यस्य संदिग्धार्थनिर्णयेपि सामर्थ्यं सनाथस्य प्र
माणत्वं प्रतिपाद्यते। स्रुवेणावद्यति स्वधितिनावद्यति हस्तेनावद्यतीत्यवदानसाधनं हेतु स्रु
वादीनि विहितानि। अवदाने च द्रवाणामाज्यादीनां संहतानां च पुरोडाशादीनां मांसादी
नां चास्ति तत्र किमविशेषेण स्रुवादीनि नियमेयुः यथासामर्थ्यं वेति। तथांजलिना सक्तून्जुहु
यादिति किं देवताप्रसादादिप्रार्थनायामिव हस्तसंयोगमात्रमेवांजलिहोमे उत सामर्थ्या
त् यथासामर्थ्यं व्याकोशो वा। तत्र विशेषाश्रवणादनियम इति प्रतिज्ञायामुच्यते। अश
क्यार्थविध्यसंभवादवश्यं विधायकस्य शक्तिः सहकारिणीत्यंगीकर्तव्यं। तस्माच्छक्तिसहायो
विधिरेव यथासामर्थ्यं विधेयं व्यवस्थापयति। द्रवादिषु स्रुवादीनां व्याकोशस्य च सक्तुषु ॥
अर्थापत्तिवशात्तस्माद्व्यवस्थेति व्यवस्थिता॥१॥ नामार्थवादविधिमंत्रयुतश्च वेदस्तद्वत्

स्मृतिश्रुत्वरितं च निरस्तादोषं॥ धर्मप्रमाणं मिह सिद्धमतः परं तद्भेदप्रकारविनियोगफला
दिचिंता॥१॥ इतिश्रीपार्थसारथिमिश्रविरचितायां शास्त्रदीपिकायां प्रथमस्याध्यायस्य च
तुर्थः पादः॥ प्रथमाध्यायः समाप्तः॥ संवत् १७८० मार्गशिरवदि सप्तमी मंगलवार देवणाग्र
टः लिखितं॥

राम
५८